ग्रन्थ संख्या १८४

# श्रीगोपालतापनी

## श्रीपादप्रबोधानन्दसरस्वती विरचित-

### कृष्णवल्लभाटीका

प्रकाशक :-

कृष्णदास बाबा

कुसुमसरोवर, राधाकुण्ड [मथुरा]

।।२ न्यौछावर ५० न०पैसे संवत्- २०२१

मु०- गौरहरिप्रेस, कुसुमसरोवर, राधाकुण्ड (मथुरा)

# श्रीगोपालतापनी

## श्रीमदनगोपालो जयति

कन्दर्पकन्दकृष्णाय गोबिन्दाय नमोऽस्तु ते ।
गोपीजनबल्लभाय स्वानुरक्तमहारिणे ॥
श्रीगोपालतापनीयश्रु तेर्व्याख्यां शुभावहाम् ।
कुर्व्वे श्रीकृष्णचैतन्यशक्त्या श्रीकृष्णबल्लभाम् ॥

त्संचितग्र'थप्रतिपादनरहस्यमाबिष्कुर्व्वन् अथात्र परं देबकृते
वरं श्रीकृष्णपूर्णतमसमस्तमहाशक्ति निजपरस्वरूपं श्रीकृष्ण-
प्रतिपादिकां तापनीयोपनिषदमाबिर्भबिष्यन्प्रणमति श्रु ति-
वा स्वप्रतिपाद्यश्रीकृष्णे स्वस्य बिश्वस्य बा तदायत्ततां प्रार्थ-

अथ क्लींकारादसृजद्बिश्वमिति प्राह श्रु तेः शिरः ।
लकारात् पृथिबी जाता ककाराज्जलसंभबः ॥

दिभिः श्रीमता गौतमेन भगबता स्वीयतन्त्रस्य प्रमाणतया
ता । तदिह पूर्बतापनी-कादापो लात्पृथिवी ईतोऽग्निर्बिन्दो
दुस्तत्संपातात्तदर्क इति क्लींकारादसृजमित्यादि प्रतीकमयी ।
रादिदेशप्रसिद्ध-पराशरगोत्रादि-ब्राह्मणसम्प्रदायसमुदायप्राप्ता-
बेदस्थपिप्पलादशाखादि-पठिता गोपालतापन्याख्या श्रु तिरि-
स्वप्रतिपाद्यं श्रीकृष्णमेव सर्बबेदान्तसंमत्या सर्बोत्तमत्वेन-
पादयन्ती नमस्करोति । सच्चिदानन्दरूपायेति ।
राधाकृष्णाभ्यां नमः ।

ओं सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो बेदान्दबेद्याय गुरबे बुद्धिसाक्षिणे ॥१॥

णाय नम इत्यन्वयः । कृष्णाय देवकीनन्दनायेति । ब्रह्मण्यो
कीपुत्र इति च यः सामोपनिषदादिषु । यश्च कृष्णस्तु भगवा-
स्वयमिति श्रीभागवतादिषु प्रसिद्धस्तस्मात् कायेन बाचा मनसा

...BJI GOUDIYA MATH ... Math ... U.P.

चात्मानं समर्पयामीत्यर्थः। तदुपर्य्यन्यस्यासद्भावात् तथैव स्वरूपेण बिशिनष्टि सच्चिदिति। सत् कालदेशापरिच्छिन्नं चित्स्वप्रकाशं आनन्दश्चातुल्यातिशयसुखम्। रूपं किं तद्रूपमित्यादि बक्ष्यमाणप्रश्नोत्तराभ्यां श्रीकृष्णबिग्रहाकारस्वरूपं यस्य तस्मै। शक्त्याधिक्येन बिशिनष्टि, अक्लिष्टकारिण इति अनायासेन सर्बकर्त्तृत्वात् सर्बतोऽप्यचिन्त्यशक्त्य इत्यर्थः ब्रह्माणं प्रति तत्क्षणेनैव सान्तर्यामिससामग्रिकानन्तब्रह्माण्डमण्डलाबिर्भाबनादेः अघासुरादीनामपि महाज्ञानिदुर्ल्लभमोक्षस्याशुप्रदानात् पूतनाया अपि तत्क्षणादेब महाजननीसाम्यप्रापणात् ब्रह्मशिबादिभ्य इब स्थाबरेभ्योऽपि बेणुबाद्यादिभिः सहसा पुलकादिमयमहाप्रेमदानात् प्रतिक्षणमपि स्वस्याऽपि बिस्मापनेण सुष्ठु सर्बचमत्कारणात् श्रीशुकसीम-परमहंस-श्रीबिरिञ्चिलक्ष्मी-सीम-परमभक्तगणस्पृहणीय सौभाग्यधरस्वभाबसिद्धनिजपरिकरबृन्दबरत्वाच्च। तत्र तत्र किं प्रमाणमित्याशंक्य प्रमाणविशेषप्रमेयत्वेन बिशिनष्टि बेदान्तबेद्यायेति। बेदान्तैः सर्वबेदसमन्वयसिद्धार्थैं र्वेदशिरोभिर्वेद्याय। तत्र श्रीबिग्रहस्य तादृशत्वं श्रीभागबतेन क्रमादुदाह्रियते। "योऽयं कालस्तस्य तेऽब्यक्तबन्धोश्चेष्टामाहुरित्यादिना"। "न चान्तर्न बहिर्यस्येत्यादिना"। "स त्वं कथं मम बिभोऽक्षपथं प्रयात" इत्यादिना। "यन्मित्रं परमानन्द"मित्यादिना च अक्लिष्टकारित्वस्य प्रमाणानि च तत्र प्रसिद्धान्येव। बेदान्तबेद्यत्वं च यथा श्रीमद्गीतोपनिषत्सु "बेदैश्च सर्व्वैरहमेव बेद्य" इति। श्रीभागबते च "मां बिधत्तेऽभिधत्ते मां बिकल्पापोह्यते ह्यहमिति"। ननु बेदान्तस्य तादृगर्थज्ञानं कुतः स्यात्तत्राह गुरब इति। तदर्थोपदेष्टृत्वेनाप्याबिर्भाबिने। तदनुभबेऽपि स एब हेतुरित्याह बुद्धिसाक्षिण इति। बुद्ध्यधिष्ठातृत्व रूपेण तत्प्रतिपादित-निजरूपानुभबस्यापि कारयित्र इत्यर्थः। तस्मात्

स एव शरणत्वेनाश्रयनीय इति तात्पर्य्यम्। अत्र विनैव फलोद्देशं नमस्कारनिर्देशाच्छुद्धभक्त एवाधिकारी। कृष्णाख्यं तादृशं वस्तु विषयः, शुद्धभक्तिरेव प्रयोजनम्। ग्रंथप्रयोजनादीनां साध्यसाधनभावः सम्बन्ध इत्यभिप्रेतम् ॥१॥

**ओं मुनयो ह वै ब्राह्मणमूचुः कः परमो देवः, कस्मान्मृत्यु र्बिभेति, कस्य विज्ञानेनाखिलं विज्ञातं भवति केनेदं विश्वं संसरतीति ? ॥२॥**

निजाभीष्टं तथैव प्रश्नोत्तराभ्यां दर्शयति-ओं मुनय इति ओमिति वागारम्भे मङ्गलार्थं, तस्यैव भगवन्नाममंत्रादिमयसर्ववाचां प्रभव-स्थानत्वात्। मुनयः प्रथमप्राप्तत्वात् सनकादयः, ह वै स्मरणे देव आराध्यः, देवत्वज्ञानार्थमेव तद्विशेषान् पृच्छन्ति कस्मादिति। मृत्युस्तत्परम्परा, अखिलं भाति अखण्डं प्रकाशते,संसरति स्वस्व-कार्य्ये प्रवर्त्तते ॥२॥

**तदुहोवाच ब्राह्मणः कृष्णो वै परमदैवतं, गोविन्दान्मृत्यु-र्बिभेति गोपीजनवल्लभज्ञानेन तज्ज्ञानं भवति. स्वाहयेदं संसरतीति ॥३॥**

तदेवं पृथग्विषयमिवाचरितानां प्रश्नानामुत्तराण्यपि क्रमेणैव तादृगेवाहेति वक्तुमाह-तदुहोवाचेति। तत् तान् प्रति उ अवधारणे ह स्फुटमिति। स्फुटमेवोवाचेत्यर्थः। स चात्र ब्रह्मा। तदुहोवाच हैरण्य इति हिरण्यगर्भत्वेन वक्ष्यमाणात् ॥३॥

**तदुहोचुः कः कृष्णो गोविन्दश्च कोऽसाविति गोपीजन-वल्लभः का स्वाहेति ॥४॥**

ततः कृष्णादीनां तत्तद्भावज्ञानार्थं पुनः प्रश्न इत्याह तदुहोचुरिति, श्रुतिमुनिप्रश्नानुसारतो ब्रह्मद्वारा श्रीकृष्णाष्टदशाक्षरमन्त्ररूपेण

श्रीकृष्णरहस्यं सर्वं वर्णयितुं मुनिप्रश्नानवतारयति। सर्वेषामेकमत्याश्चर्य्यरहस्यप्रश्नेऽपि संकोचं न कृतवन्तः, तेन शंकाभावात् स्पष्टमुचुः। भजनरसविशेषः कथं स्यादिति विचाररूपमननपरवशतया वा ब्राह्मण इति। ब्रह्मभावभावनयैवावस्थितमित्यर्थः। अतएव श्रीकृष्णाख्यं प्रतिपादयति परमो देवः श्रीकृष्णः तद्भजनं ब्रह्मानन्दसमूहरूपं व्याचष्टे ब्रह्मानन्दचमत्काराभेदात्। मृत्युर्माया मृत्यूपलक्षितजीवसंसारहेतुभूता कुतो बिभेति प्रायशो भगवत्स्वरूपाणि वेदमर्य्यादानुसारीणि एव। ज्ञानप्रेमातिशयदर्शनेऽपीत्येवं प्रश्नः, ब्राह्मणेति, अर्थविशेषलाभाय कृष्णरूपदेवो भगवान् कृष्ण एवेति। कृष्णो हि पूर्णसमस्तशक्तिमान्। कृष्णः परमं परमपुरुषार्थसीमस्वरूपम्। कृष्णे एकान्तभक्तिमद्भ्योऽपि तन्मायैव बिभेति। कस्य ज्ञानेनाखिलं भातीत्यस्योत्तरमाह-गोपीजनवल्लभज्ञानेन तत्सकलं भगवत्स्वरूपज्ञानं भवति। स कृष्णो गोपीजनवल्लभशब्दार्थतया ज्ञातश्चेद्भवति तदा तज्ज्ञानेन सर्वं ज्ञायत इति। ताः प्रेमशक्तयः, तत्समूहस्य वल्लभः प्रेमशक्त्यपरनाम्नी स्वा श्रीकृष्णभक्तिः हा इति स्वीया ॥४॥

**तानुवाच ब्राह्मणः पापकर्षणो गो-भूमि वेदविदितो विदिता गोपीजना विद्याकलाप्रेरकस्तन्माया चेति सकलं परं ब्रह्मैव तत् ॥५॥**

तत्र क्रमेणोत्तरं दर्शयितुमाह तानुवाचेति। प्रायमत्रासुरापराधपर्य्यन्तं यस्तेषामपि सर्व्वापराधनाशनः स एव परमाराध्य इत्यर्थः। कर्षति सर्व्वापराधानिति कृष्णशब्दस्य निरुक्तिविशेषात्। तत एवं भूतत्वेन श्रीमद्भागवतादौ प्रसिद्धः। स एव तच्छब्दाभिधेय इति भावः। अत्र "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचक" इत्याद्यनुसारेण केषाञ्चिन्मते सच्चिदानन्दरूपता तु सच्चिदानन्दरूपायेत्यनेनोक्ता। अथ मात्वशब्दस्य नानार्थत्वतां प्रत्ययभेदं चाव-

लम्ब्याह-गोभूमीति एक विशेषणं गौः प्रसिद्धपशुजातिविशेषः। गौर्भूमिश्च गौर्वेदश्चेति गावः तेषु विदितो विख्यात इति तान् विदितावेदिता लब्धेति च गोविन्द इत्यर्थः। अत्र पशुजातिविशेषणेन श्रीमन्नन्दगोकुलस्था एव गाव उच्यन्ते, तत्रैव तस्य विख्यातेः, ताभिश्च श्रीमन्नन्दगोकुलमखण्डमेवाभिलक्ष्यते। तत्र विदित इति स्वैरक्रीड़त्वेन प्रसिद्ध इत्यर्थः। मथुराद्वारकादिलीलायां दैत्यानां युद्धमरणादिरूपं धर्म्मं मर्य्यादीकृत्यैव मारणा अत्र तु पूतनादौ तदनुसरणात्तत्रापि महाभक्तवत्तत्र गतिदानात् स्वैरक्रीड़त्वेनैव व्यक्तीभवतीति। तस्माद् गोविन्दात् एव मृत्युरधिकं बिभेतीति भावः। तथैव हि भूमिषु सर्व्वभुवनेषु तथा वेदेषु विदित उद्घुष्यत इत्यर्थः। विदितेतिपक्षे स एवार्थः। गोकुले स्वरूपेण भूमिवेदयोर्यशोद्वारा तस्य तथा प्राप्तत्वात्। गोपीजनेति, गोपीजनरूपाः खलु गोपीजनवल्लभज्ञानेन तज्ज्ञातं भवतीति पूर्व्वोक्तात्। अविद्यायाः कलाः सम्यग्विद्याया. प्रेमभक्तिविशेषरूपाया मूर्त्तयः। तासां प्रेरकः स्वलीलासु प्रवर्त्तको रमण इत्यर्थः। राजविद्या राजगुह्यमिति श्रीमद्भगवद्गीताप्रकरणात्। "आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः। गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामीति" ब्रह्मसंहितातः। स वो हि स्वामी भवतीत्युत्तरतापनीभ्यः। अत्रान्यत्र च तथा ध्यानोपदेशाच्च। अर्थान्तरे यत्र विद्याविद्ये न विदामो विद्याविद्याभ्यां भिन्न इत्युत्तरतापिनीवाक्यं। "ह्लादिनी संधिनी संवित् त्वय्येका सर्व्वसंस्थितौ। ह्लादतापकरी मिश्रा त्वयि नो गुणवर्ज्जिते" इति विष्णुपुराणवाक्यम्। "ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः। अविद्यासंवृतो जीवः संक्लेशनिकराकर" इति स्वामिसूक्तं च विरुद्धयोः। उक्तं च ताभिराश्लेषणे तस्यापि प्रकाशाधिक्यम्। "तत्रातिशुशुभे ताभिर्भगवान् देवकीसुत" इति।

तस्माद् गोबिन्दत्व ज्ञानेऽपि परमप्रेमात्मक-तद्विशिष्टताज्ञानेनैव सुष्ठु तज्ज्ञानं भवतीति भाव:। यत एवोक्तं श्रीमदुद्धवेनापि- "बांछन्ति यद्भवभियो मुनयो बयं चेति"। "नायं श्रियोंऽग उ नितान्तरते: प्रसाद" इति च। अतो यद् ब्रह्मसंहितायाम् "चिंतामणिप्रकरसद्मसु कल्पबृक्षलक्षावृतेषु सुरभीरभि पालयन्तम्। लक्ष्मीसहस्रशतसंभ्रमसेब्यमानं गोबिन्दमादिपुरुषं तमहं भजामीति" श्रूयते। तदपि बैकुण्ठादिप्रसिद्धलक्ष्मीतोऽप्याधिक्यान्महालक्ष्मीत्वेन मन्तब्यम्। तन्माया चेति। स्वाहा शब्देन तन्मायोच्यत इत्यर्थ:। माया चात्र योगमाया चिच्छक्तिरिति याबत्। तद्रूपा बा। "त्रिगुणात्मिकाथ ज्ञानं तथा चिच्छक्तिरेव च। मायाशब्देन भण्यते शब्दतत्वार्थबादिभिरिति" शब्दमहोदधिपाठात्। माया वयुनं ज्ञानमिति निर्घण्टु:। माया दम्भे कृपायां चेति बिश्वप्रकाशात्। चिच्छक्तित: कृपायां च सर्बेषां सब्बप्रबृत्तिभूतायास्तस्य एव स्यादिति पूर्बप्रश्नोपयोग्युत्तरमायाति। को ह्येवान्यात् क: प्राण्यात् यदेष आकाश आनन्दो न स्यादिति। चक्षुषश्चक्षुरिति। तस्य भासा सर्बमिदं बिभातीति श्रुते:। न च संहरति मायेत्यस्य वा। अन्यथार्थत्वमाशंक्य श्रीभगवति स्वात्मार्पणार्थरूपत्वेन निर्बक्ष्यमाणस्य तत्पदस्य संसारहेतुरूपार्थत्वबिरोधात्। तदेवं प्रश्नानुसारेण पृथगिव तानर्थान्निरूप्य अपृथक्त्वमेव दर्शयति सैव पर्य्यबसीय तस्य शब्देन क्षेत्रज्ञा इति चित्प्रकृति: परा। तया अब्यक्त उद्भूति मुखचेष्टित बर्गेष: अतएव हे बिश्वस्य लय: स्वाहा लयो भवेदिति भाव:। तादात्म्यापपन्ना सैबोक्ता सकलं परं ब्रह्मेब तदिति। तत्पूर्बोक्तचतुष्टयार्थकज्ञातं श्रीकृष्णाख्यं नराकृति परं ब्रह्मैवेत्यर्थ:। श्रीकृष्णस्यैव बिशेषणभेदेन गोबिन्दादिब्यपदेशद्वयात् पंचमपदादस्य च तत्स्वरूपशक्तित्वेन तदभेदादिति भाव:। अस्यैव ब्रह्मत्वमुत्तरतापन्यां

दर्शयिष्यते । कथं वास्यावतारस्य ब्रह्मता भवतीत्यादौ । यथैव विष्णुपुराणे-"यदोर्वंशं नरः श्रुत्वा सर्व्वपापैः प्रमुच्यते । यत्रावतीर्णं कृष्णाख्यं परं ब्रह्मनराकृतीति" । ब्रह्माण्डपाद्मादौ नराकृति परं ब्रह्मेति । श्रीभागवते च - गूढं परं ब्रह्म मनुष्यलिङ्गमिति । तदिदं ब्रह्माद्वयं शिष्यत इति । यन्मित्रं परमानन्दं पूर्णं ब्रह्मसनातनमिति । श्रीभगवद्गीतासु च । ब्रह्मणो हि प्रतिष्ठाहमिति । तदेवं प्रशंसाद्वारापि स्थापयति ॥५॥

**यो ध्यायति रसति भजति सोऽमृतो भवति सोऽमृतो भवति इति ॥६॥**

यो ध्यायतीति एतद्यो ध्यायति इति तु पाठान्तरम् । एतत् कृष्णाख्यमेव । साधारणस्याहाख्यशानिमत । यो ध्यायति । यः कश्चित् स एवाधिकारी । अमृतः परमानन्दघनमूर्त्ति र्भवति । रसति आस्वादपूर्वकं भजति सर्व्वोपाधिनैरास्येन ॥६॥

**ते होचुः किं तद्रूपं किं रसनं कथं वाहो तद्भजनं ? तत् सर्वं विविदिषतामाख्याहीति ॥७॥**

तत्र ध्येयं रसनादिकं चापृच्छन्नित्याह-ते होचुरिति । तद्रूपं ध्यानं श्रीकृष्णस्वरूपविशेषरूपमेव ध्येयत्वेनाधिगमितम ॥७॥

**तदुहोवाच हैरण्यो गोपवेशमभ्राभं तरुणं कल्पद्रुमाश्रितम् ॥८**

तत्र रूपमाह-गोपवेशमिति, तरुणंकि शोरं, अभ्राभं मेघवच्छयामम् ॥८॥

**तदिह श्लोका भवन्ति ॥९॥**

तत्तस्मिन् रूपे तत्तद्भक्तहृदि नानाविधं स्फुरति । इह ममापि यथा स्फुरति तत्संग्राहकाः श्लोकाः मंत्राः ॥९॥

**सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरम् ॥१०॥**

सत्पुण्डरीकं उत्कृष्टं आरक्तं कमलं शुद्धसत्वमयं नयनं, मेघाभं मेघ ईषदेव भाति यस्मात् मेघापेक्षया कृष्णे श्यामताया अतिचमत्कारात् वैद्युतं विद्युद्दुद्भवमिवाम्बरं यस्य। ज्ञानमुद्राढ्य "अवचनेनैव प्रोवाचेति श्रुतेः"। ज्ञाने या मुद्रा रीतिः। मौनरूपा तयाढ्यम्। रसविशेषेण वेणुवादेन रसाविष्टत्वात्। मौनमुद्राढ्यमिति च पाठः ॥१०॥

**गोपगोपीगवावीतं सुरद्रुमतलाश्रितम्। दिव्यालङ्करणोपेतं रक्तपङ्कजमध्यगम् ॥ कालिन्दीजलकल्लोलसंगिमारुतसेवितम्। चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेति ॥११॥**

गोपाः श्रीदामादयः, गोप्यः श्रीराधिकाद्याः गावः कपिलाद्यास्ताभिरावीतं इति शब्दो ध्यानसमाप्त्यर्थः ॥११॥

**तस्य पुनरसनम् ॥१२॥**

द्वितीयप्रश्नस्योत्तरमाह-तस्येति। तस्य रूपस्य पुन ध्यानानन्तरं यद्रसनमास्वादस्तदेव रसनमित्यर्थः। तेनाजहल्लक्षणया प्रेमापि गृह्यते। रस्यं पुनारसनमिति क्वचित् पाठे रस्यमास्वाद्यं यत्तदीयं प्रेम तदेव रसनमास्वादोऽपीत्यर्थः। एतदुक्तं भवति आस्वादः खलु श्रीभगवन्माधुर्य्यानुभवः, यस्माच्च प्रेम जायते। तच्च भगवत्सेवाभिलाषोल्लासमयमानसानुकूल्यातिशयः। सोऽयमास्वाद्यमाने श्रीभगवति स्वयमास्वाद्यविशेषतां प्राप्नोति। परमपुरुषार्थत्वेन स्फूर्त्तेः, तदेव तस्यास्वादत्वं कारणतादात्म्यापेक्षयेति ॥१२॥

**जलभूमीन्दुसंपातकामादिकृष्णायेत्येकपदं गोविन्दायेति द्वितीयं गोपीजनेति तृतीयं वल्लभायेति तुरीयं स्वाहेति पंचममिति। पंचपदीं जपन् पचांगं द्यावाभूमीसूर्य्याचन्द्रमसौ साग्नी तद्रूपतया ब्रह्म संपद्यते ब्रह्मसंपद्यत इति ॥१३**

अथ भजने निर्वृत्त्ये श्रीभगवत्सम्बन्धप्रतिपत्त्यर्थं महामन्त्रं पुनरुपदिशति जलेति । जलं ककारः तद्वाचित्वात् । भूमिर्लकारः लकारबीजत्वात् । तथा ई दीर्घईकारः । ईर्गमनं कामो वा कामादिकृतसंधित्वात् । इन्दुरनुस्वारः । तदाकारत्वात् तेषां संपातो मिलनं तेन जातं यत्कामबीजं तदादिकं, कृष्णायेत्येकपदम्, पंचाङ्गानि हृदादीनि तत्तत्स्थानेऽन्यस्थानियस्य तद्यथा स्यात्तथा जपन् , तस्यां च पचरत्र्यां श्रीभगवद्दात्मिकाद्यावादिपंचाधिष्टातृदेवता भावयन् इत्यर्थः । तद्रूपतया मंत्ररूपतया ब्रह्म संपद्यते । यद्वा तच्छब्देन यच्छब्दो लभ्यते । ततश्च यौ द्यावाभूमी उद्र्ध्वाधः प्रदेशौ सर्व्वाश्रयौ, यौ च साग्नी सूर्य्याचन्द्रमसौ सर्व्वप्रकाशकौ तद्रूपतया तानि रूपयति प्रकाशयतीति तद्रूपं तत्तया, यत्पचांगं ब्रह्म तत्संपद्यते सम्यक् प्राप्नोति । अत्र प्रथमपदद्वयेन प्रथमपदद्वयस्याश्रयणीयतायाः प्रकाशनं व्यज्यते । अन्य त्रयेण अन्यत्र यस्य प्रकाशकतायास्तद्व्यज्यत इति गम्यते । तत्र च प्रथमपदस्य सर्व्वशक्तिप्रकाशकतन्मूलनामत्वेन सर्व्वोद्र्ध्वतया द्यावायोगः । द्वितीयस्य भूमिप्रकाशस्य न तादृशवैभवत्वाद्भूम्या योगः । तृतीयस्य सर्व्वतोऽप्युद्दीप्तभावत्वात्सूर्य्येण योगः । चतुर्थस्य तत्कान्तियोगेण सर्व्वाल्हादकत्वाच्चंद्रमसा योगः । पंचमस्य तत्रार्पणार्थरूपस्य नित्यसम्बन्धादग्निना योग इति । उभयत्र पक्षे नराकृतिपरंब्रह्म श्रीकृष्णं प्राप्नोतीत्यर्थः । श्रीमद्ब्रह्मणश्चन्द्रध्वजस्य च तथा वक्ष्यमाणत्वात् । आवृत्तिर्निद्धारणार्था प्रथमोपनिषत्समाप्त्यर्था ॥१३॥

तदेष श्लोकः ॥१४॥

तत्र मंत्रसंवादपादमाह । तदेष श्लोक इति । तदिति तस्मिन् पूर्वमुक्ते जपप्रभावे अत्याश्चर्य्ये, विशेषावधार्य्ये एष श्लोको भवतीत्यर्थः ॥१४॥

**क्लीमित्येतदादायादाय कृष्णायेति गोविन्दायेति च । गोपीजनवल्लभाय बृहद्भानव्या सकृदुच्चरयेद्या गतिस्तस्यास्ति मंक्षु नान्या गतिरिति ॥१५॥**

तदुदाहरति-क्लीमित्येतदिति । आदौ आदाय उच्चार्य्य क्लीमित्युक्त्वा कृष्णायेति वदेत् । अथ गोविन्दाय गोपीजनवल्लभायेति । अनन्तरं बृहद्भानव्यान्तिमपदरूपया सह । बृहद्भानुरग्निस्तस्येयं बृहद्भानवी । बृहद्भानोः स्त्री स्वाहा तया सह । तत्तत्पदक्रमेण यः सकृदप्युच्चरेत् तस्य गतिः श्रीकृष्णाख्यः शीघ्रमेव भवेत् । अन्या गतिर्न भवेदित्यर्थः । तस्मादेतदेव श्रीगुरोः शिक्षणीयमिति भावः । इति शब्दो मंत्रसमाप्त्यर्थः ॥१५॥

**भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्मनःकल्पनमेतदेव च नैष्कर्म्यम् ॥१६॥**

कथं वाहो तद्भजनमित्यस्योत्तरं वक्तुं भजनशब्दस्यार्थमाह-भक्तिरस्य भजनमिति । भक्तिशब्दवाच्यः प्रसिद्धोऽर्थऐव । अस्य श्रीकृष्णस्य भजनमुच्यत इत्यर्थः । तदेव बिशदयति तदिहेति लोकद्वयकामनानिरसनेन श्रीकृष्णे मनोऽर्पणमेवास्य भजनमित्यर्थः । मूलमन्त्रेऽपि चतुर्थ्यन्ततन्मूलनामानि अन्तिमद्वयचत्तरपदान्वयेन तस्यैवार्थस्य स्फुटत्वात् । एतदर्थमेव मूलमन्त्रदर्शनपूर्व्वकमेतद्दर्शितमितिभावः । तदेवं वृत्तमूलस्थानीयस्य मनसोऽर्पणेन शाखास्थानीयतत्तदिन्द्रियार्पणस्यापि भजनत्वं विवक्षितम् । ननु अनादिजन्मकर्मश्रेण्यां सत्यां कथं तस्य मंक्षु सैव गतिः स्यात्तत्राह । एतदेव च नैष्कर्म्यं तद्धेतुरित्यर्थः । आवश्यकताकारणत्वादभेदनिर्देशः । यद्वा न च तस्माज्ज्ञानं नाम भिन्नमस्तीत्याह एतदिति । तद्भजनमेव च नैष्कर्म्यं ज्ञानमित्यर्थः । निष्कर्मेव नैष्कर्म्यं स्वार्थे-घञ् । कर्मज्ञानयोर्मिथः प्रतियोगित्वात् कर्मातिरिक्तं ज्ञानमुपल-

द्दितं भवतीति। ज्ञानत्वं च तस्य मनोवृत्तिविशेषतयाविर्भावा-
दिति ॥१६॥

**कृष्णं तं विप्रा बहुधा यजन्ति गोविन्दं सन्तं बहुधाराध-
यन्ति गोपीजनवल्लभो भुवनानि दध्रे। स्वाहाश्रितो जग-
देजयत्सुरेताः ॥१७॥**

तदेवं मूलमन्त्रेण समुदितं भजनस्य निर्वचनं दर्शयित्वा तत्रैव
मन्त्रनामत्रयस्य शक्तिचतुर्थीकस्योत्तरोत्तरवैशिष्ट्यं दर्शयितुमाह-
कृष्णं तं विप्रा इति। तत्र कृष्णं तं गोपालं श्रीयादवेन्द्ररूपं विवे-
केन कृष्णत्वमात्रेणाविर्भूतसन्तं विप्राः शास्त्रमार्गिणो यजन्ति।
क्वचिद्विप्रा पूजयन्ति इत्यस्या भावे पूजनबलेन त एवोपतिष्ठते।
अथ तमेव श्रीगोविन्दं गोकुलनायकतयाविर्भूतं सन्तं बहुधा
श्रीगोकुलवासिवद्रागवैचित्र्या आराधयन्ति सेवन्ते। तदीयरा-
गरुचय इति शेषः। स एव गोविन्दो गोपीजनवल्लभरूपेणाविर्भू-
तस्तु भुवनानि जगन्त्येव दध्रे अनुगृन्हातीत्यर्थः। तादृशोपासक-
संबन्धपरम्परयापि तदनुग्रहप्राप्तेर्नात्र पूर्ववदाराधनापेक्षापीति
भावः। तत्रैव स्वात्मार्पणमयस्वाहापदेनाश्रिताश्रयमाणश्चेत्
कृष्णः। तमाश्रयमानो वा। जनस्तदा जगदपि एजयत् एजयति,
प्रेम्ना कम्पादिभावविवशं करोति। यतः सुरेताः आविर्भूतमहा-
वीर्योऽसाविति अत्र बीजानुवादस्तन्नामान्तर्भूतस्तदितिविवक्षया
॥१७॥

**वायुर्यथैको भुवनं प्रविष्टो जन्ये जन्ये पंचरूपो बभूव।
कृष्णस्तथैकोऽपि जगद्धितार्थं शब्देनासौ पंचपदो विभा-
तीति ॥१८॥**

अथ तस्यैकस्यापि तत्तत्पदेनाविर्भाववैशिष्ट्यं दृष्टान्तेन स्पष्टयति
वायुरिति। जन्ये जन्ये देहे देहे पंचभिः प्राणादिनामभिः रूप्यन्ते

निरूप्यन्ते पंच रूप शब्देन तत्तन्नाम्ना पंचाभिविशेषैः पद्यते ज्ञायते यः स इत्यर्थः। इति शब्दो मंत्रसमाप्त्यर्थः ॥१८॥

**ते होचुः उपासनमेतस्य परमात्मनो गोविन्दस्याखिलाधारिणो ब्रूहीति ॥१९॥**

तत्र शास्त्रैकगम्यत्वात् पूजापरिपाटीमपृच्छन्नित्याह ते होचुरिति। परमात्मन सर्वजीवजीवनरूपस्य अतएवाखिलाधारिणोऽखिलाश्रयस्येत्यर्थः ॥१९॥

**तानुवाच यत्तस्य पीठं हैरण्याऽष्टपलाशमम्बुजं तदन्तरालिकेऽनलास्त्रयुगं तदन्तराद्यर्णाखिलबीजं कृष्णाय नम इति बीजार्थं स ब्रह्माणमाधाय अनङ्गगायत्रीं यथावद्व्यालिख्य भूमण्डलं शूलवेष्टितं कृत्वांगवासुदेवादि-रुक्मिणीस्वशक्तीन्द्रादिवसुदेवादिपार्थादिनिध्यादिवीतं यजेत् ॥२०॥**

यंत्रात्मकं पीठं तावद्दर्शयति तानुवाचेति। यत्तस्य पीठं तत् तान् प्रति ब्रह्मा उवाचेत्यर्थः। तदिदं पटलप्रायलिखनेन व्याख्यायते। स्वगृहे क्षालितं पीठं स्थापयित्वा हैरण्याष्टपलाशं सौवर्णाष्टदलमम्बुजं स्थापयेत् गंधपूतेन चन्दनेन वा लिखेत्। तदन्तरालिके तस्य कमलस्यान्तः प्रदेशे अनलास्त्रयुगं त्रिकोणद्वयं सपुटितं लिखेदित्यर्थः। तस्य षट्कोणस्यान्तरा मध्ये आद्यार्णरूपं अखिलकार्य्यस्य बीजं कामबीजं साध्य नाम कर्म च लिखेदितिभावः। तदुक्तं सनत्कुमारसंहितायाम्-"कर्णिकायां लिखेद्वह्निपुटितं मण्डलद्वयम्। तस्य मध्ये लिखेद्बीजं साध्याख्यं कर्म संयुतमिति"। कृष्णाय नम इति च बीजेनाढ्यं इति षडस्रसन्धिषु षडक्षरं लिखेदितिभावः। षडस्रसन्धिष्विति क्रमदीपिकोक्तेः। स ब्रह्माणमिति-पूर्वलिखितकर्णिकास्थमनङ्गबीजं सब्रह्माणमष्टादशाक्षरमन्त्रोपेतमाधायेत्यर्थः। मन्त्रतद्द्रष्टोरभेदात् मंत्रो ब्रह्मा मंत्रदेवत-

योरभेदात् । परब्रह्मरूप इति वा। तदुक्तं तस्यामेव संहितायां-"ततः शिष्टैर्मनोर्वर्णैस्तं कामं वेष्टयेत् सुधी"रिति । षट्कोणस्य पूर्वनैऋत्यवायव्यकोणेषु श्रीबीजं लिखेत् आग्नेयपश्चिमेशानकोणेषु ह्रीं बीजं लिखेत् । तदुक्तं तस्यामेव-"श्रियं षट्कोणकोणेषु इन्द्रनैऋत्यवायुषु । आलिख्य विलिखेन्मायां वन्हिवारुणशूलिष्विति" । अनङ्गगायत्रीमिति । अष्टदलस्य केशरेष्वनङ्गगायत्रीं यथावत् त्रिशस्त्रिशो विलिखेत् । कामदेवाय विद्महे इति कामगायत्रीं तदष्टदलेषु ओं नमः कामदेवाय सर्व्वजनप्रियाय सर्व्वजनसंमोहनाय ज्वल प्रज्वल सर्वजनस्य हृदयं वशीकुर वशी कुरु स्वाहेत्यष्टचत्वारिंशदक्षरं मालामन्त्रं प्रतिदलं षट् षडक्षरक्रमेणालिखेदित्येव बोद्धव्यम् । अष्टदलस्योपरिवृत्तं कृत्वा मांत्रिकाक्षरै र्वेष्टयेदित्यपि बोद्धव्यम । तदुक्तं तस्यामेव- "अक्षरैः कामगायत्र्याः वेष्टयेत् केसरे सुधीः । काममालामनोर्व्वर्णैर्दलेष्वष्टसु मंत्रवित् । लिखेद्गुहाननैर्भक्तै र्मान्त्रिकांस्तद्वहिर्लिखेत्" इति । भूमण्डलं शूलवेष्टितं कृत्वेति । भूगृहं चतुरस्रं स्यादष्टवज्रयुतं मुनेइति तत्संहितोक्तेः । अत्र गुहस्याननैः षड्भिरित्यर्थः । भक्तैर्विभक्तैः वर्णैरित्यर्थः । अस्यैव धारणयंत्रत्वात् । साध्यादिलिखनमपि आदौ असूसुचत् । अतएव धारणविधानं तत्फलं च तस्यां संहितायामेवोक्तम् । "हुत्वा सहस्रमाज्येन यंत्रे संपातपूर्वकम् । मार्जयित्वायुतं हुत्वा धारयेद्यन्त्रमुत्तमम् । त्रैलोक्यैश्वर्य्यमाप्नोति देवैरपि सुपूजितः" इत्यादिना । यदातु पूजार्थं यन्त्रं क्रियते तदातु । उक्तं तस्यामेव-"मण्डूकादिपृथिव्यन्तं पूजयेत् कर्णिकोपरि । अग्न्यादिपीठपादेषु धर्म्मादींश्चतुरो यजेत् । तारवर्णप्रभिन्नानि मण्डलानि क्रमात्ततः । सत्वं रजस्तम इति यजेदात्मचतुष्टयम् ॥ आत्मान्तरात्मा परमात्मा ज्ञानात्मेति च क्रमात् । विमलोत्कर्षिणी ज्ञाना क्रियायोगेति पंचमी । प्रह्वी सत्या तथेशाना नुग्रहा नवमी

स्मृता। प्रागाद्यष्टसु पत्रेषु कर्णिकायां यजेन्मुनिः”। “ओं नमो भगवते विष्णवे सर्वभूतात्मने सर्वात्मसंयोगयोगपद्मपीठात्मने नमः” इति पद्मोपरि विन्यस्योक्तसंहितानुसारेण सब्राह्मणं ओंकारसहितं यद्वा तानुवाच हैरण्य इत्यन्वयः। तस्य कृष्णस्य यत्पीठं यत्रावाहयोपास्य तद्धोवाचेत्यर्थः। क्वचिद्धैरण्यमष्टेति पाठोऽस्ति। तत्र ज्योतिर्म्मयमम्बुजमित्यर्थः। उद्यद्विरोचनरित्युक्तेः। हैरण्यमित्यनेन पीतत्वप्राप्तेः। पीतारुणयोरीषद्भेदाज्ज्योतिर्मयत्वमात्रोक्तेः। अष्टौ पलाशानि पत्राणि यस्य। तदन्तरालिकं तस्य पद्मस्य मध्ये अन्तराले कर्णिकायां वर्त्तमानम्। अनलस्याग्नेर्यदस्त्रं त्रिकोणरूपमण्डलं तद्द्वयं तन्मध्ये आद्यमक्षरं बीजरूपं लिखेत्। खिलैस्तन्मात्रन्यूनैरितरमन्त्राक्षरैर्वीतम्। यद्वा क्लीं बीजमादौ यस्य तत् कृष्णाय नम इति सबिसर्गपंचाक्षरमाधाय अस्रसन्धिषु श्रीं ह्रीं रमां भुवनेशां लिखेत। अमा श्री र्न मीयते परिच्छिद्यते इति अमा। सब्रह्मणमिति। ब्रह्म श्रीकृष्ण एवाष्टदशाक्षररूपं विलिख्य अथानङ्गस्य कामदेवस्य मनुर्मालामन्त्रस्तत्सहितां कामगायत्रीं चाधाय दलाष्टके यथावद्व्यापय्य। स ब्रह्मा उवाचेति। व्यवहितान्वयो वा सब्रह्मणां सप्रणवसरस्वतीं मातृकां दलवाह्ये वेष्टयित्वा भूमण्डलं यथावत् शूलवेष्टितं कृत्वा। भूमण्डलस्य यथावत् करणं। तत्र श्री ह्रीं बीजयोर्जनमेव। “ततः पीठं समभ्यर्च्य देवमावाह्य भक्तितः। अर्घ्यादिधूपदीपादीनुपचारान्प्रकल्पयेत्”। अथावरणपूजा-तत्र प्रथमावरणमाह-अंगमिति। षट्कोणस्य आग्नेयनैऋत्यवायव्येशानेषु हृदय शिर शिखाकवचानि अग्रभागे नेत्रं पूर्व्वादिदिक्षु चास्त्रमित्यंगानि पूजयेत्। द्वितीयावरणमाह-वासुदेवादीति। पूर्वपश्चिमयाम्नोत्तरदलेषु यथाक्रमं वासुदेवसंकर्षणप्रद्युम्नानिरुद्धान् पूजयेत। आग्नेयनैऋत्यवाय्येशानेषु यथाक्रमम् शान्ति-

श्रीमरस्वतीरती: पूजयेत्। तृतीयाबरणमाह-रुक्मिण्यादीति। या रुक्मिण्याद्या: स्वशक्तय: श्रीकृष्णशक्तयो दलेषु। "रुक्मिणी सत्यभामा च जाम्बबत्यपरा तत:। नाग्नजिती मित्रवृन्दा कालिन्दी च तत: परा। लक्ष्मणा च सुशीला च पूज्या एता शुभप्रभा:"॥ इति प्रसिद्धास्ता: पूजयेत्। चतुर्थपंचमाद्या-बरणमाह-इन्द्रादीति। अत्र बासुदेबाद्याबरणमेब चतुर्थं ज्ञेयम्। पूर्बभागे बसुदेबाय पीतबर्णाय, अग्निकोणे देबक्यै श्यामलायै, दक्षिणकोणे नन्दाय कर्पूरगौराय, नैऋते यशोदायै कुंकुम-गौर्य्यै, पश्चिमे बलदेबाय शंखेन्दुकुन्दधबलाय, बायव्ये कलायै श्यामलायै सुभद्रायै, उत्तरकोणे-गोपेभ्य:, ऐशाने गोपीभ्य:। श्रीदेबकीयशोदयोर्बर्णबिभागोऽयं सनत्कुमारसंहितानुसारेण अस्यास्तापन्याष्टीकाकारबिशेषेण बिश्बेश्बरभट्टेन लिखित:। यथोक्तं गौतमीतंत्रे च। "देबकी श्यामसुभगा सर्बाभरणशोभना। यशोदा हेमसंकाशासितबस्त्रयुगाबृतेति"। तदेबमेब शारदातिलक-कारकृता माधबभट्टेन क्रमदीपिकां ब्याचक्षणेन क्रममपि त्यक्त्वा व्याख्याते। मातरौ यशोदादेबक्यौ, कीदृश्यौ अरुणश्यामले इति। अत: चात्र कुंकुमगौरतामयी ज्ञेया। केचित्तु क्रमदीपिका-क्रमानुसारेण बर्णबिपर्य्ययं मन्यन्ते किंतु भबेत्तदप्युपासकानुभ-बप्रामाण्येनेति। प्रस्तुतमनुसराम:। पंचमं तु पार्थाद्याबरणम् अर्जुननिशाठोद्धबदारुकबिष्बक्सेनसात्यकिगरुडनारदपर्बता: इति क्रमेण षष्ठं निध्याबरणम् पूर्बस्मिन् इन्द्रनिधये, आग्नेये नीलनिधये, याम्ये कुन्दाय, नैऋत्ये मकराय, पश्चिमेऽनंगाय, बायव्ये कच्छ-पाय, उत्तरे शंखाय, ऐशाने पद्मायेति सप्तममिन्द्राद्याबरणम् इन्द्राय पीतबर्णाय पूर्बदले,एबमाग्नेयादिषु। अग्नये रक्तबर्णाय यमाय नीलोत्पलबर्णाय, नैऋत्ये रक्षोऽधिपतये कालबर्णाय बरुणाय शुक्लबर्णाय, बायव्ये धूम्रबर्णाय कुबेराय नीलबर्णाय,

ईशाय श्वेतवर्णाय पूर्वेशानयोर्मध्ये ब्रह्मणे पलाशकुसुमाकाराय नैर्ऋतपश्चिमयोर्मध्ये शेषनागाय शुभ्रवर्णाय, एवं वज्राय पीतवर्णाय, शक्तये शुक्लवर्णाय, दण्डाय नीलवर्णाय, शंखाय श्वेतवर्णाय, पाशाय विद्युद् वर्णाय, ध्वजायै रक्तायै गदायै नीलायै, त्रिशूलाय शुभ्राय इत्यष्टमावरणमिति ॥२०॥

**सन्ध्यासु प्रतिपत्तिभिरुपचारैस्तेनास्याखिलं भवत्याखिलं भवतीति ॥२१॥**

सन्ध्यासु त्रिकालसंध्यासु, प्रतिपत्तिभिर्ध्यानैः, उपचारैः पंचोपचारादिमहाराजोपचारांतैश्चतुष्पादैः षष्ठ्युपचारादिभिः पूजयेदित्यर्थः। तेनाराधनेन अस्याराधकस्य अखिलं पुरुषार्थचतुष्टयं भवति। त्रिकालसम्बन्धिध्यानपूजे चात्रोक्ते प्रतिपत्तिभिरुपचारैरितिपाठे बुद्ध्या संपादितैरित्यर्थः। यद्वा प्रतिपत्तिभिर्ध्यानैस्तद्दर्शनादिचित्तनैर्बाह्यैश्चोपचारैः प्रतिपद्यन्ते श्रीकृष्णं प्राप्नुवन्ति, ये उपचाराः प्रति- पत्तिर्भावना तन्मयैः स्वेष्टप्रेमरसमययत्नेन चिन्तितैरित्यर्थः। प्रतिपत्तिर्ज्ञानं तद्रूपैरिति वा। तेन यजनेनास्य साधकस्य अखिलं श्रीकृष्णे महा प्रेमलक्षणा भक्तिः सर्वोत्तमं अशेषवाञ्छितं भवति। अकामितमपि कृष्णार्चनप्रभावेण संपद्यते। अन्यदल्पं वाञ्छितमपि वाञ्छातीतमतिदुर्लभमपि स्वयमेव भवतीत्यर्थः। द्विरुक्तिर्निश्चयार्थः। अभ्यासो द्वितीयोपनिषत्समाप्त्यर्थो वा। अखिलं फलं तत्प्रेमपर्य्यन्तः सर्व एव पुरुषार्थस्तद्भावनानुसारेण भवतीति। अतिपत्तिभिरिति पाठे अतिक्रम्य पत्तिः प्राप्तिर्येषां तैः द्विपान्तरोद्भवैरत्यन्तदुर्लभैरित्यर्थः। यद्वा अतिशयेन पत्तिः प्राप्तिर्यस्येति। सुलभैः पत्रपुष्पादिभिरित्यर्थः। मतिपत्तिभिरिति। मानसपूजायां सुलभैव सर्व्वं, मानसै र्नानोपहारैः सर्व्वर्त्तौ समस्तफलपुष्पादिसंपत् सदैव भवतीति मनोमयी

अर्चाऽपि श्रेष्ठा एव। मनोनैश्चल्ये सति स्वतएव भवतीति ॥२१॥

**तदिह श्लोका भवन्ति ॥२२॥**

तत् तस्मिन् तत्तत्साधकभूते एतन्मंत्रोपासनफले इह मयापि सम्यगनुभूयमाने सविशेषतन्निरूपिका श्लोका भवन्ति। नित्यं सन्त्येव। नतु मया उच्यते। अपि तु अहमेव श्लोकरूपा इत्यर्थः। उक्तोपासने मन्त्रसंमतिमाह तदिहेति ॥२२॥

**"एको वशी सर्व्वगः कृष्ण ईड्यः एकोऽपि सन् बहुधा यो विभाति। तं पीठस्थं येऽनुयजन्ति धीरास्तेषां सुखंशाश्वतं नेतरेषाम् ॥२३॥**

तत्र श्रीकृष्णमायाखिलान् सौख्यजातान प्रच्यावयेदपि अदास्य-सौख्यत्वात्। श्रीकृष्णदत्तां त्वखिलां सुखर्द्धिं कालोऽपि न च्याव-यितुं समर्थ इत्याह-एक इति। एकः स्वयं भगवत्त्वेनासमोर्द्ध्व-त्वात्। यथोक्तं श्रीभागवते-"स्वयं त्वसाम्यातिशयस्त्र्यधीश" इति। अतो वशी सर्ववशयिता यतः सर्वगः सर्वव्यापकः स च कृष्णः कृष्णस्तु भगवान् स्वयमित्यादिषु यः प्रसिद्धः स एव। अतः स एवेड्यः सर्वस्तुत्यः। ननु श्रीकृष्णरूपेणापि बहव आविर्भावा दृश्यन्ते कथमेकत्वं तत्राह- एकोऽपि सन्निति। अचिन्त्य-शक्तित्वात्तथोक्तं तत्रैव-"चित्रं बतैतदेकेन वपुषा युगपत् पृथक्। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहदिति"॥ धीराः शुकादि-वद्विवेकिनः। तेषां शाश्वतं यत्सुखं तत् सुखमितरेषाम्। अन्येषां महानारायणाद्युपासकानामपि न इत्यर्थः। "यन्मर्त्यलीलौ-पयिकं स्वयोगमायाबलं दर्शयिता गृहीतम्। विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गमिति"॥२३॥

**नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तं पीठगं तेऽनुयजन्ति धीरास्तेषां सिद्धिः**

**शाश्वती नेतरेषाम् ॥२४॥**

द्वितीयश्लोकेन पूर्वोक्तं सुष्ठु निरूपयन्नन्यदप्याह-नित्यो नित्यानामित्यादि। तन्नित्यत्वेनैवान्येषां नित्यत्वमित्यर्थः। एवं चेतयितॄणां जीवानां चेतयितृत्वमपि। तदुक्तं तत्रैव-"सर्वेषामपि जीवानां भावार्थो भवति स्थितः। तस्यापि भगवान् कृष्णः किमेतद्वस्तु रूप्यता" मिति। अतः कृष्णः नित्या ये केचन पदार्थास्तेषां मध्ये परमनित्यः। नन्वनुक्ता एवोपासकास्तथेति तेषां संकीर्णत्वं स्यात्तत्राह-एको बहूनामिति। एक एव फलदाता बहूनां कामानिष्ठान् बिदधाति करोति। यो यत् किञ्चत् कामं करोति स तत्कामितं तेन तुष्टात् श्रीकृष्णादेव लभते। एकोऽपि सन्निति। तदेव कामान् तत् प्रेममयान् तेषां या शाश्वती सिद्धिः सा तु इतरेषां नेति पूर्ववत्। तथा च व्याख्यातं विश्वेश्वरभट्टैः-ये धीरा एकाग्रचित्ताः भजन्ति तेषामेव शाश्वती नित्यानन्दात्मिका सिद्धिरियम्। न तु इतिरेषां तद्भक्तिरहितानां, अचक्षुषामिव रूपदर्शनमिति ॥२४॥

**एतद्विष्णोः परमं पदं ये नित्योद्युक्ताः संयजन्ते न कामात्। तेषामसौ गोपरूपः प्रयत्नात् प्रकाशयेदात्मपदं तदैव ॥२५॥**

एतत्पूर्वं च रूपं संयजन्ते यथोक्तमुपासते न तु कामान् कामयन्ते इति शेषः। आत्मपदं स्वचरणसरोजं आत्मना स्वेनाधिष्ठितं पूर्वोक्तपीठं वा। यद्वा आत्मा श्रीमूर्त्तिरेव पद्यते जायते यत्र। परमानन्दमहोदधिरूपं अत्र च गोपरूपमात्मपदं प्रकाशयेत्। सहजनन्दकुमारस्वरूपं तत्क्षणादेव दर्शयेत् ॥२५॥

**योवै ब्रह्माणं बिदधाति पूर्वं यो विद्या रतस्मै गापयति स्म कृष्णस्तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणममुं व्रजेत् ॥२६॥**

तत्र साधकतमत्वेन तत्कृपैवान्वेष्येति दर्शयंस्तस्य तद्रूपत्वेन नित्यावस्थायित्वमपि दर्शयति-यो ब्रह्माणमिति। विद्या वक्ष्यमाणरीत्या अष्टादशार्णाद्या: आत्मबुद्धिप्रकाशं आत्मन एव सकाशात् बुद्धे: सर्वस्यापि ज्ञानस्य प्रकाशो यस्य तं शास्त्रयोनिमित्यर्थ:। यो ब्रह्माणं विदधाति सृजति तं प्रति य: कृष्ण: विद्यां गापयति, वै निश्चये अमुं श्रीकृष्णमेव शरणं व्रजेत् ॥२६॥

**ओंकारेणान्तरितं ये जपन्ति गोविन्दस्य पंचपदं मनुं तं तेषामसौ दर्शयेदात्मरूपं तस्मान्मुमुक्षुरभ्यसेन्नित्यं शान्त्यै ॥२७॥**

तस्यैव मन्त्रस्य प्रणवसम्बन्धेन जपमात्रात् पूर्वोक्तसम्यग् यजनफलमभिव्यजयति। ओंकारेनान्तरितमिति तेन संपुटितमित्यर्थ:। तेषामिति तान् प्रतीत्युवाचेत्यर्थ:। तस्मै वेति पाठे तेषां मध्ये यस्य कस्यचिन्न तु ब्रह्मादितुल्यस्यैवेति नियम इत्यर्थ:। मुमुक्षु: सर्वमन्यत् परित्यक्तुमिच्छु: अभ्यसेत्। तन्मंत्रमात्रं यत् नित्यशान्त्यै सर्वेऽपि द्रवरहित-नित्यतादृग्सुखायेत्यर्थ:, पंचपदमित्यनेनार्थानुसंन्धानपूर्वकमिति ॥२७॥

**एतस्मादन्ये पंचपदादभूवन् गोविन्दस्य मनवो मानवानां दशार्णाद्यास्तेऽपि संक्रन्दनाद्यैरभ्यस्य ते भूतिकामैर्यथावत् ॥२८॥**

तस्यैव मन्त्रस्य सर्वतन्मत्रबीजत्वमाह-एतस्मादिति। मानवानां नानावासनजीवानां कृतेऽभूवन। सनकादिषु प्रादुर्भूता:, भूतिकामैरपीत्यन्वय:। तत्र संक्रंदनाद्यै भूतिकामै:, सनकाद्यैर्मुक्तिकामै:, श्रीनारदाद्यैर्भक्तिकामैरिति मन्त्रानुसारेण ज्ञेयम ॥२८॥

**यदेतस्य स्वरूपार्थं वाचा वेदयन्ति ॥२९॥**

तत्र हेतु: यदेतस्येति। यत् यस्मात् कारणात्। एते मंत्रा:

श्रीकृष्णमंत्राः अस्य श्रीकृष्णस्य स्वरूपमर्थं स्वरूप एव सर्वपुरुषार्थसाधकं यत् तद्वाचा वेदयन्ति प्रकाशयन्ति ॥२९॥

**ते पप्रच्छुः ॥३०॥ तदुहोवाच ॥३१॥**

अथैव सत्यतर्क्यपरमनिरतिशयशक्तिमतत्वं मंत्रस्य श्रुत्वा विस्मितास्ते मुनयः पप्रच्छुः ॥३०॥
तदु तदेव ह स्फुटं ब्रह्मा उवाच। यद्वा तत् पंचपदपंचस्वरूपमपि ह किल ॥३१॥

**ब्रह्मसवनं चरतः मे ध्यातः स्तुतः परमः परार्द्धान्ते सोऽनुबुध्यत गोपवेशो मे पुरस्तादाविर्बभूव ॥३२॥**

ब्रह्मसवनमिति किं ब्रह्मणः समयं प्रथमपरार्द्धं तमनु वर्त्तमानस्येति मे मया ध्यातः स्तुतः परमः परमेश्वरः परार्द्धान्ते स गोपालः अबुध्यत तथाभूते मय्यवधानं कृतवान्। यद्वा मयि कृपां करोत्विति ध्यातः स्तुतश्च। स च ध्यानेन स्तुत्या विषयीकृतश्च परार्द्धान्ते समये मया गोपवेशोऽबुध्यत गोपाल एव सर्वोत्तमत्वेन हृदयागतः। ततोऽनुरूपभावस्फूर्त्या पुरस्तादाविर्बभूव अतः गोपालवेश एव पूर्वं मया अज्ञातः, अष्टादशार्णपरमप्रतिपाद्ये रूपे सर्वोत्तमत्वे सर्वानन्दपरमसीमतया च परमोत्तमसुखसाम्राज्यस्य कारुण्यादिगुणानां परमोत्कर्षतया मे पुरस्तादाविर्बभूव ॥३२॥

**ततः प्रणतो मयानुकूलेन ह वा ममाष्टादशार्णं स्वरूपं सृष्टये दत्त्वाऽन्तर्हितः ॥३३॥**

ततश्च मया प्रणतो नमस्कृतः सन् अनुकूलेन हृदा सानुग्रहेण स्वरूपं स्वस्वरूपभूतमिति सर्वेषामेवार्थानामुत्पादनशक्तित्वं प्रदर्शितम्। सृष्टये दत्वेति। तथापि तदुपयोगानुसारेणैव यत् किञ्चित् फलमुदेतीतिभावः ॥३३॥

**पुनः सिसृक्षता मे प्रादुरभूत्। तेष्वक्षरेषु भविष्यज्जगद्रूपं**

प्रकाशयत् ॥३४॥

पुनः सिसृक्षत इति तेष्वष्टादशस्वक्षरेषु भविष्यज्जगत् प्रकाशयन् मम गोचरं कुर्वन् ॥३४॥

**तदिह कादापो लात् पृथिवी ईतोऽग्निर्बिन्दोरिन्दुस्तत्संपातात्तदर्क इति क्लींकारादसृजं ॥३५॥**

तदिहेति तत्रास्मिन् जगद्रूपे प्रकाशिते सति इह अष्टादशाक्षरमन्त्रे अहं कात् ककारात् तेषां संपातात् तेषां कादीनां संश्लिष्टरूपात् क्लींकारात् तदर्कः स प्रसिद्धोऽर्कः इति एतान् पंचासृजम् । मन्त्रस्य अक्षरेषु येषु यत् यथा दृष्टा यदसृजत्तदाह तस्मिन् तत्राक्षरे स्थिते मयैव च साक्षादृष्टे जगति तन्मध्ये कात् आसमीचीना अपः असृजं आसमन्तात् ककारोच्चारणप्रभावत एवेति । लकारात् पृथिवी जाता ईकारादग्निरुद्भूतः बिन्दोश्चन्द्रमण्डलं संयोगादर्क इति सूर्य्यमण्डलं एतसर्वं क्लींकारादहमसृजम् ॥३५॥

**कृष्णायादाकाशं खाद्वायुरित्युत्तरात् सुरभिं विद्याः प्रादुरकार्षं तदुत्तरात् स्त्रीपुमादि चेतीदं सकलमिति सकलमिति ॥३६॥**

कृष्णायादिति-कृष्णायेति पदादाकाशमिति पदार्थं खाद्वायुरिति आकाशाच्छब्दराशिर्वेदितुं गोविन्दायेति पदाद्वायुरिति पदार्थं उत्तरात् पदद्वयात्मकात् गोपीजनवल्लभायेतिपदात् सुरभिं कामधेनुं विद्याश्चतुर्दश प्रादुरकार्षम् । तदुत्तरात् स्वाहापदात् स्त्रीपुमान् क्लीवं च इतीदं सकलं स्थावरं जङ्गमं च प्रादुरकार्षं अभ्यासस्तृतीयोपनिषत् समाप्त्यर्थः । अत्र च केषाञ्चित् पाठान्तरे व्याख्या चेयम्-तथैवाह पुनः सिसृक्षा मे प्रादुरभूदिति श्रीगोपाल एव स्वयं तेष्वक्षरेषु सूक्ष्मरूपेण जगदस्तीति श्रीगोपाल एव स्वयमपि स्फोरयामासेत्यर्थः । कात् ककारजपप्रभावात् आपो जाता

इति भाव:। एवं लात् पृथिवी जाता ईकारादग्निः बिन्दोरिन्दुः संयोगजपप्रभावात् अर्कः। अनेन प्रकारेण असृजं किञ्च कृष्णादिति यावद्वायुरितीति। वायुमित्यर्थः। उत्तराद्गोविन्दायेत्यस्मात् सुरभीं गोजातिं विद्यां च चतुर्द्दश तदुत्तरात् गोपीजनेत्यादितः सकलमिदं वल्लभाय स्वाहेत्यतः गोप्या रुक्मणीया स्त्रियः स्त्रीत्तनात् पुमांसः वल्लभात् अयः शुभावहो विधिः एतत् प्रभृतिकं स्वाहा इति स्वा स्वार्थं हा हानिलाभादिकं तेन न जानन्ति स्थावरादयः गवादयोऽपि स्वं शुभाशुभं कर्म्म नहि जानन्ति इति। अवादीनामीश्वरसृष्टचरत्वेऽपि स्वसृष्टत्वेनोक्तिर्व्यष्टिसृष्टयर्थम्। तेषामेवांशभूतेन परिनामविशेषसंपादनं यत् तदपेक्षयैवेति ज्ञेयम्। किंतु कादापः इत्यनेन मूलतदादीनामपि तत्तच्छक्त्यैवोत्पत्तिरिति ज्ञापितम्। इदं सकलमिति श्रीकृष्णप्रेरितत्वात् प्रादुरकार्षम्। द्विरुक्तिर्निश्चयापादनायेति ॥३६॥

**एतस्यैव यजनेन चन्द्रध्वजो गतमोहमात्मानं वेद॥ ३७॥**

तदेवं स्वोपयोगानुसारेण फलोदयमुक्त्वा फलविशेषोदयमप्यन्यदर्शयति एतस्यैवेति पूर्वमष्टादशाक्षरमन्त्रमयत्वेनोक्तस्य श्रीगोपालस्यैव यजनेन चन्द्रध्वजो नाम राजा गतमोहं यथास्यात्तथात्मानं वेद बुबुधे ॥३७॥

**इत्योङ्कारान्तरालिकं मनुमावर्त्तयेत् सङ्गरहितोऽभ्यानयत् ॥३८॥**

इति तत्तत्फलप्राप्तिहेतोरिदानीन्तनोऽपि ओंकारान्तरालिकं प्रणवसंपुटितं अष्टादशाक्षरं मन्त्रमावर्त्तयेत् संगेन स्फूर्त्त्यन्तरेण रहितः सन् आवर्त्तयेत्। तेनावर्त्तनेन अभि प्रत्यक्षं श्रीगोपालमानयत्। श्रीकृष्णमेव साक्षात्कृतवान्। इत्यस्य यजनं तादृशजपश्चैत्युपासनावैशिष्ट्यात् फलस्य शीघ्रातिवैशिष्ट्यं दर्शितम्। अत्र केषाञ्चिन्मते चन्द्रध्वजः शिवः आत्मानं संवेदयत्वादनुभव-

योग्यं कृत्वा ओंकारान्तरालिकं मनुमावर्त्तयेच्चन्द्रध्वजः ततश्च संगरहितोऽभ्यानच्दिति पूर्ववत् ॥३८॥

**तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् ॥३९॥**

अत्राभ्यनयेत् तत् तस्य गोलोकाख्यमधिष्ठानमाह तद् विष्णोरिति। दिवि आकाशे विततं विसृतं चक्षुः सूर्य्यमिव "नमः सवित्रे जगदेकचक्षुषे भूनप्रसूतिस्थित्युक्ते:" ॥३९॥

**तस्मादेनं नित्यमभ्यसेत् नित्यमभ्यसेत् ॥४०॥**

इत्थं मन्त्रशक्तिकार्य्यमद्भुतं निरूप्य उपसंहरति-तस्मादिति यस्मादेतादृशप्रभावोऽयं मन्त्रः तस्मादेनं मंत्रं नित्यमभ्यसेत्। आवर्त्तयेत्। द्विरुक्तिरतिसादरे कर्त्तव्यतां द्योतयति ॥४०॥

**तदाहुरेके ॥४१॥**

नित्याभ्यासोऽस्य प्रभावा विश्वासिनं प्रति प्रतस्य विश्वासमुत्पाद्य बुद्धिं प्रवेश्य सर्वसंपादनार्थं इदानीं अस्माद्विश्वोद्भवे मतान्तरमुपन्यस्यति तदिति। तत् तत्र सृष्टिविषये एके आहुः श्रुतिरेव भङ्ग्या पक्षद्वयमाह। भक्तानामपि तथा तथा अनुभवोऽस्तीत्यनुवादः संगच्छते। यद्वा तत् तत्र अष्टादशाक्षरे एके कदाचिदेव तदिति तन्मात्रज्ञानिनः ॥४१॥

**यस्य प्रथमपदाद्भूमिर्द्वितीयाज्जलं तृतीयात्तेजश्चतुर्थाद्वायुश्चरमाद्व्योमेति। वैष्णवपंचव्याहृतिमयं मन्त्रं कृष्णावभासकं कैवल्यसृत्यै सततमावर्त्तयेदिति ॥४२॥**

यस्य प्रथमपदादिति। प्रथमपदद्वितीयपदादि-भूजलादेरधिष्ठानं भूरादिपंचकृतं वैष्णवेति वैष्णवपंचव्याहृतयः पूर्वोक्तानि पंचपदानि तन्मयं तद्रूपमंत्रं कृष्णावभासं तदाविर्भावकं कैवल्यसृत्यै कैवल्यरूपा या सृतिः भक्तिरूपा भगवत्पद्धतिः तस्यै तां साधयितुमि-

त्यर्थः। कैवल्यसंमनपथस्त्वथ भक्तियोग इति श्रीमद्भगवतात्। यद्वा पदाद्युच्चारणात एव भूम्यादिसृष्टिसामर्थ्यं स्यात् इत्यपि ज्ञेयम्। विशेषज्ञानं पदपदार्थज्ञानं तु दुर्लभ एव। अतः सततमावर्त्तयेत्। यतो व्याहृतिमयं व्याहृतिरूपं पदपंचकं पुनर्विशिनष्टि कृष्णावभासकं कृष्णस्वरूपं कृष्णवाचकः विष्णुसंज्ञः पुरुषोत्तमाख्यो देवरूपः। कृष्णस्यावस्थाविशेषः पुरुषोत्तमश्चतुर्भुजः। अतः परमोत्कर्षोऽयं मन्त्रः ॥४२॥

**तदत्र गाथा ॥४३॥**

तत्तस्मिन् मन्त्रशक्तिकार्य्ये जगतः सृष्टयादौ पदक्रमेणोक्ते: अत्रोक्तसृष्टौ गाथा श्लोका भवन्ति ॥४३॥

**यस्य पूर्वपदाद्भूमिर्द्वितीयात् सलिलोद्भवः। तृतीयात्तेज उद्भूतं चतुर्थाद्गन्धवाहनः। पंचमादम्बरोत्पत्तिस्तमेवैकं समभ्यसेत्। चन्द्रध्वजोऽगमद्विष्णोः परमं पदमव्ययम् ॥४४॥**

यस्य मन्त्रस्य पूर्वपदाद्भूमिरित्यादि तमेव केवलं सम्यगभ्यसेत नान्यत्। एकं केवलं मंत्राभ्यासमात्रं कुर्यात्। यस्य केवलसम्यगभ्यासमात्रेण चन्द्रध्वजो विष्णोः परमं पदमगात् तन्मंत्रश्चायं पंचपदात्मकः। कृष्णसमप्रभावस्तस्मादभिन्नतयैव ज्ञातव्यमिति ॥४४॥

**ततो विशुद्धं विमलं विशोकमशेष-लोभादि-निरस्तसंगं यत्तत्पदं पंचपदं तदेव स वासुदेवो न यतोऽन्यदस्ति ॥४५॥**

तत इति ततस्तस्मात् विशुद्धं सत्वमयं अतएव सुतरां विमलं रजस्तमः शून्यं अतएव विशोकं अशेषा ये लोभादयस्तेषां निरस्तः संगो यस्तादृशं यत्पदं गोलोकाख्यं तदेव पंचपदं तदाख्यमन्त्रमयं तच्च सप्रसिद्धो वासुदेवस्तदात्मकं इति त्रयाणामेकोक्तिरेकमेव तत्वम् त्रिधाविभूतमिति ज्ञापनाय। तस्य वसुदेवस्य वैभवमाह-यतः

सकाशादन्यत् किमपि नात्यन्तं भिन्नमस्ति यदन्तभूतमेव सर्वमित्यर्थः ॥४५॥

**तमेकं गोविन्दं सच्चिदानन्दविग्रहं पंचपदं वृन्दावनसुरभूरुहतलासीनं सतं समरुद्गणोऽप्यहं परमया स्तुत्या तोषयामि ॥४६॥**

सर्वत्र स्वस्य ध्येयमुपदिशति तमेकमिति । तं मुक्तसर्वबिधि सर्वोत्कर्षं एकं केवलं अन्यदशेषमन्तस्थं श्रीगोबिन्दाख्यं सच्चिदानन्दलक्षणं यत्परं ब्रह्म तद्रूप एव बिग्रहो यस्य । परब्रह्मैव श्रीकृष्णस्वरूपं, पंचपदं तन्मन्त्रात्मकं श्रीबृन्दाबनसुरभूरुहतले रत्नमण्डपमध्यगरत्नभूसिंहासने आसीनं सततं बिस्तृतलीलासहितं समरुद्गणं एकान्तभक्तदेबगणसहितं प्रकृतानामेतेषां तत्राप्रवेशात । तत्रस्थैर्ब्रह्बादिभिस्तेषां तत्संगिनां अभेदभाबनया तथोक्तम । परया परमोत्कर्षप्रतिपादिकया स्तुत्या तोषयामि सन्तुष्टं करोमि ।४६।।

**ओं नमो बिश्वरूपाय बिश्वस्थित्यन्तहेतबे । बिश्वेश्वराय बिश्वाय गोबिन्दाय नमो नमः ॥४७॥**

ओं नम इति स्तुतिरियमैश्वर्य्यबिशेषान्माधुर्य्यबिशेषाञ्च दर्शयंती सर्बानेबोपासकाननुगृह्णाति । तत्र बिश्वरूपायेत्यादिकं स्वमोहनतल्लीलायामपि दृष्टत्वादिति भाबः ॥४७॥

**नमो बिज्ञानरूपाय परमानन्दरूपिणे । कृष्णाय गोपीनाथाय गोबिन्दाय नमो नमः ॥४८॥**

नमो बिज्ञानेति । बिज्ञायतेऽनेन सर्बमीदृशं रूपं यस्य बिशिष्टज्ञानरूपं ॥४८॥

**नमः कमलनेत्राय नमः कमलमालिने । नमः कमलनाभाय कमलापतये नमः ॥४९॥**

कमलानां गोपीरूपाणां पतये । "श्रियः कान्ता कान्तः परमपुरुष"

इति ब्रह्मसंहितातः ॥४६॥

**बर्हापीडाभिरामाय रामायाकुण्ठमेधसे । रमामानसहंसाय गोबिन्दाय नमो नमः ॥५०॥**

बर्हालङ्कृतो विचित्रकुसुमादिक्लिप्त आपीडो यस्य। सच स्वत एवाभिरामश्च तेन वा अभिरामः सुन्दरः। रामायेति रमयतीति मनोहररूपाय अंशेन रामरूपायेति। अकुंठा मेधा यस्य तस्मै, रमाः गोप्यः तासां मानसे सदावासी हंस इति। ५०॥

**कंसवंशबिनाशाय केशिचाणूरघातिने । बृषभध्वजबन्द्याय पार्थसारथये नमः ॥५१॥**

कंसबंशबिनाशायेति कंससम्बन्धी यः कश्चन बंशस्तस्य बिनाशो यस्मात्। कंसेन ये ग्राहिता आसुरभावा स्तैरन्यैर्ग्राहिता तैश्चान्य इत्येवं कंसबंशो बिगतो नाशो यस्मात् तस्मै। केशीचानूरौ घातितवान्। वृषभध्वजबन्द्यायेति बाणयुद्धे शिबमोहनसूचना पार्थसारथित्वेन भारतयुद्धबत् ॥५१॥

**बल्लवीनयनाम्भोजमालिने नृत्यशालिने। नमः प्रणतपालाय श्रीकृष्णाय नमो नमः ॥५२॥**

**बेणुबादनशीलाय गोपालायाहिमर्द्दिने। कालिन्दीकूललोलाय लोलकुंडलधारिणे ॥५३॥**

श्रीबृन्दाबननागरयोरद्भुताद्भुतमहारसाम्भोधिसमुज्जृम्भणकरी बेणुरयं श्रीकृष्णसुखमशेषमास्वादयति श्रीकृष्णरूपगुणान् गायन्तीं राधिकां प्रमोदयति। स्वमेव हि श्री कृष्णबेणौ बाद्यं जायतेति बेणुबादनशीला यस्य। लोलकुंडलबलाव इति क्वचित्पाठः ॥५२॥

बल्लबीनयनान्येबाम्भोजानि तान्येब प्रतिसंक्रान्तत्वात् मालारूपाणिबिद्यन्ते यत्र तस्मै। बदनाम्भोजेति क्वचित्पाठः। ५३॥

**नमः पापप्रणाशाय गोबर्द्धनधराय च। पूतनाजीविता-न्ताय तृणावर्त्तासुहारिणे ॥५४॥**

नमः पापप्रणाशायेति स्पष्टम् ॥५४॥

**निष्कलाय बिमोहाय शुद्धायाशुद्धबैरिणे। अद्वितीयाय महते श्रीकृष्णाय नमो नमः ॥५५॥**

निष्कलाय निर्मायाय बिगतो मोहो यस्मात्तस्मै, अशुद्धीनां दैत्यत्वादीनां बैरिणे मर्द्दनाय। न द्वितीयः स्वयं भगवल्लक्षणः समरूपो यस्य तस्मै, अतएव महते, यद्वा निष्कलाय कलयति ग्राहयति स्वधर्म्मं कला उपाधिभूता माया सा निर्गता यस्मात् निःशेषेण कलयति बशीकरोति जनानिति कला चिद्रूपा सो यस्मिन् तस्मै। यद्वा निष्कं पदकं कंठे लातीति तस्मै ॥५५॥

**प्रसीद परमानन्द प्रसीद परमेश्वर? । आधिब्याधिभुजंगेन दष्टं मामुद्धर प्रभो! ॥५६॥**

आधिस्तदप्राप्तौ मानसीब्यथा, ब्याधिस्तत्र यासीद्व्यथा मामुद्धर उद्धृत्य निजचरणसमीपं कुरु इत्यर्थः ॥५३॥

**श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर! । संसारसागरे मग्नं मामुद्धर जगद्गुरो! ॥५७॥**

श्रीकृष्णेति श्रियः कृष्णः श्रियैब सर्बमुत्कर्षं प्राप्तः, श्रिया शोभया बिश्वाकर्षकः, बिभूतिसीम राजराजेश्वर रुक्मिणीकान्त, जगति त्वमेकयोग्यो गुरुः परमज्ञानोत्कर्षात् ॥५७॥

**केशब क्लेशहरण नारायण जनार्द्दन। गोबिन्द परमानन्द मां समुद्धर माधब! ॥५८॥**

कश्च ईशश्च बशीक्रियत इति केशबः, कुटिलकुन्तलयुक्तो बा मा लक्ष्मीः तस्या धबः स्वामी ॥५८॥

अथ हैवं स्तुतिभिराराधयामि तथा यूयं पंचपदं जपन्तः श्रीकृष्णं ध्यायन्तः संसारदुःखं तरिष्यथेति हो वाच हैरण्यः ॥५९॥

अमुं पंचपदं मंत्रमावर्त्तयेद्यः स यात्यनायासतः केवलं तत्पदं। अनेजदेकं मनसो जवीयो न यद्देवा आप्नुवन् पूर्वमर्शदिति ॥६०॥

उपसंहरति काण्डत्रयेण अथ हैवमिति, अत्र अमुं पंचपदं इति तरिष्यथ इति च हो वाच हैरण्यः इत्यस्यान्वयः। मध्यपातित्वात्। केवलं शुद्धं तत् श्रीगोलोकाख्यं पदं पूर्वं तच्छ्रीगोपालाख्यं पदंपूर्वं परमया स्तुत्या तोषयानीत्युक्त्वा ओं नमः इत्यादिना माधव इत्यन्तेन स्तुतिरुक्ता, अथानन्तरं एतां स्तुतिं कृत्वा एवं स्तुतिभिरित्थंभूतान्याभिरपि स्तुतिभिः ह स्फुटं तमहमाराधयामि। यद्वा अथ एतत् स्तुत्या संतोषानन्तरभावविशेषोदयेन तादृशस्वरूपेण प्रेमरसे प्रविष्टः। तत्रैव वैदग्धीविशेषस्फूर्त्या श्रीकृष्णस्यानन्दचमत्कारविशेषार्थपूर्वक-बहुभिः स्तुतिभिः सेवाविशेषं आराधनं करोमि यथाहं तथा यूयं पंचपदं जपन्तः, पंचपदं विवरणं हृदिस्थं कृत्वा स्तुतिसहितं यथा भवति तथा कृष्णं प्रकटमन्त्रार्थरूपं ध्यायन्तः तदाविष्टचित्तवृत्तिं कुर्वन्तः जपध्यानमात्रेण संसारं तरिष्यथ संस्काररूपं संसृतिहेतुमपि भवद्भिः श्रुतिपंचपदमहिम्ना स्वाभीष्टपदं प्राप्स्यथ स्तुत्यर्थज्ञानपूर्वकं मनो निरुद्ध्य जपः कृष्णध्यानं दुर्लभं तथापि यथा कथञ्चिदुच्चारणमात्रेणापि परमपुरुषार्थशिरोमणिभूतं स्वाभीष्टं लप्स्यथ इति ॥५९॥

हैरण्यो ब्रह्मा ह स्फुटं उवाच अमुमिति। अमुं पंचपदं मन्त्रं आवर्त्तयेदिति। रसनास्पृगेव फलति केवलं, माया अविद्या मीयते माया जड़चिद्द्वैतमात्रदृष्टिरहितं शुद्धप्रेमरसमयं पदं याति प्राप्नोति अनायासतः श्रवणादिभक्तियुक्तः सन्निति बोद्धव्यम्। तस्य ब्रह्मस्वरूपत्वं

दर्शयति अनेजन् निश्चलं मनसो जवीयः तच्छुक्तया गोचरः, देवाः ब्रह्मादयोऽपि न यत् आप्नुवन् न प्राप्तुं शक्नुवंति । स्वयं तु कालतो देशतश्च पूर्वेषु मर्शन् व्याप्तुं समर्थ इत्यर्थः । तदुक्तं श्रीभागवते-"इति संचित्य भगवान् महाकारुणिको बिभुः। दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनन्तं यद् ब्रह्म-ज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिता" इति । श्रीहरिवंशे च श्रीकृष्णं प्रति महेन्द्रेण-"तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि । उपर्युपरि तत्रापि गतिस्तव तपोमयी । यां न विद्मो वयं सर्वे पृच्छंतोऽपि पितामहमिति ॥६०॥

**तस्मात् कृष्ण एव परो देवस्तं ध्यायेत् तं यजेदिति ओं तत्सत् ॥६१॥**

अथ कः परमो देवः इत्यादिषु प्रश्नोत्तरतया प्रकृतमुपसंहरति तस्मादिति । कृष्ण एव परमो देवः परमपुरुषः परमेश्वरः । तदुपासनैव सर्व - पुरुषार्थ इति । तथाचोक्तं श्रीभागवते-"यद्वाञ्छया श्रीर्ललना चरेत्तपो," "यान् ब्रह्मेशो रमादेवीदध्युमूर्ध्न्यघनुत्तये" यस्मादेवं श्रीकृष्णमहिमा तस्मात् श्रीकृष्ण एवेति द्विरुक्तिर्निश्चयार्थः । ओमिति पूर्णब्रह्म ओंकारात्मकं तत् सत् तदेव सत्यम् ॥६१॥

इतिश्रीगोपालपूर्वतापनी समाप्ता ।

इति शब्दः समाप्तौ

इतिश्रीगोपालतापन्याः पूर्वभागविवृत्तिः ॥



# श्रीगोपालतापनी

## उत्तरविभागः

**एकदा हि व्रजस्त्रियः सकामाः शर्वरीमुषित्वा सर्वेश्वरं गोपालं कृष्णं हि ता ऊचिरे ॥ उवाच ताः कृष्णः ॥१॥**

श्री

शान्तं मनो निगमसंयमनाय नित्यं
का वा कृता विविधयोगविधौ न वार्त्ता !
श्रीमत्प्रबोधपदपंकजभावनेन
प्राप्तं परं पदमहो महिमा तदीयः ॥०॥
बृन्दाबने मधुबने बहुलाबने च ।
भाण्डीरभद्रकुमुदे च महाबने च ।
गोबर्द्धने च परिबर्द्धितचित्रमोदं
श्रीमत्प्रबोधमरबिन्दमुखं स्मरमि ॥०॥

श्रीगोपालो जयति ॥०॥

पूर्बतापन्यां तस्मात् कृष्ण एव परो देब इत्युपसंहारतात्पर्येण महाबाक्येन श्रीकृष्णस्य तादृशत्वं यदुक्तं तदेबोत्तरतापन्यां प्रकारान्तरेण बिब्रियते ब्रह्ममुनिसंबादभंग्योक्तिश्रुत्या। तथा श्रीकृष्णभक्तितद्भक्ततत्स्थानतन्मंत्रादीनां चोत्कर्ष उक्तः, सम्प्रति श्रुतिस्पष्टयन्ती ब्रह्मनारायणसंबादाभ्यामन्यानापि कांश्चन बिशेषान् दर्शयितुं व्रजसुन्दरीदुर्बासः संबादमबतारयति एकदा हीति। सकामाः अनबच्छिन्नकृष्णसंगाभिलाषाः, उषित्वा श्रीकृष्णसंनिधौ रात्रिमनुक्रीडित्वेत्यर्थः। व्रजस्त्रियः कृष्णमूचिरे इति उवाच ताः कृष्ण इति यथोचितमग्रेऽनुबर्त्तनीयम् ॥१॥

**अनु'कस्मै ब्राह्मणाय 'भक्ष्यं' दातव्यं भबति ? ॥२॥**

तत्र व्रजस्त्रीणां बाक्यमाह-अनु कस्मा इति। अनुअनुचरं यस्मै तद्दानेन सदा भबत्संगाबियोगः स्यात्तस्मै कस्मा इत्यर्थः ॥२॥

**दुर्वासमेति ॥३॥**

अथ श्रीकृष्णवाक्यं दुर्वासम इति वक्तव्ये सति श्छान्दसः। अयं भावः मया तस्मै भक्तदापनमिदमुपलक्षणमेव। स एवामामभीष्ट-सिद्धिं बोधयिष्यति। यतो ब्रह्मनारायणसम्प्रदायेन, सम्प्रति मदीयतापनीश्रुतितत्वः। सम्प्रति मदाविर्भावमयव्रजसमीपवासेनोपसंक्रान्ततादृशस्नेहलेशः सर्वत्र निरपेक्षत्वेनामामपि प्रतेतव्यकथाऽस्माविति तद्वारैव उपदेशोऽभीष्ट इति ॥३॥

**कथं यास्यामोऽतीर्त्वा जलं यमुनाया यतः श्रेयो भविष्यति ॥४॥**

अथ तासां वाक्यं कथमिति, यमुनाया जलमिति योज्यम् जलमिति तस्यां जलप्राचुर्य्यविवक्षया, अतीर्त्वेति स्वेषां दक्षिणतीरे तस्या उत्तरतीरे स्थितिरिति बोध्यते। यतस्तं विना पारगमनमशक्यम्। तरणोपायस्तु कोऽपि न दृश्यते अनस्तमेव कथयेत्याह। जलमात्रं तर्तुं न शक्यते किं पुन र्महावर्त्ततरंगादिभीषणा सम्पूर्णयमुना इतिभावः। अत्र यमुनां तीर्त्वा गमनेनास्माकं यतः श्रेयोऽभीष्टं भवति तदुपदिशेत्यर्थः ॥४॥

**कृष्णेति ब्रह्मचारीत्युक्त्वा मार्गं वो दास्यति ॥५॥**

अथ पुनः श्रीकृष्णवाक्यं कृष्णेति ब्रह्मचारीति। कृष्णो ब्रह्मचारीति क्रमेणोक्तस्थितानामित्यर्थः। कृष्णेति सात्रिश्छान्दसः, दास्यति यमुनेति शेषः, यद्वा कृष्ण इति नामा यः स ब्रह्मचारीति वाक्यं यमुनायामुक्त्वाव्रजन् ततो वो युष्माकं मार्गं यमुना दास्यतीत्यर्थं यद्वा जलं स्तम्भयिष्यति मार्गं यथा भवति जलं पृथक करिष्यति एतच्च गोपीनां सन्देहनिरासेन अभोष्टसिद्धयै व्याजेन प्रश्नवीजमुपन्यस्तम्। अत्र गोपीभिः श्रीकृष्णोऽपृष्ट नारायणसमेति श्रुत्वा ॥५॥

**यं मां स्मृत्वाऽगाधा गाधा भवति, यं मां स्मृत्वाऽपूतः पूतोभवति, यं मां स्मृत्वाऽव्रती व्रतीभवति, यं मां स्मृत्वा सकामो निष्कामो भवति, यं मां स्मृत्वाऽश्रोत्रीयः श्रोत्रीयो भवति ॥६॥**

कुतस्तत्राह-यं मां स्मृत्वेति-यं मां स्मृत्वा स्थितस्य जनस्य अगाधा स्वप्रमाणेनातलस्पर्शापि यमुना गाधा तलस्पृश्या भवति इदमपि यत्किंचिदेव । यत अपूतो दैत्यादिरपि पूतो मुक्तो भवतीत्यर्थः । अव्रती व्रतमात्ररहितोऽपि सर्वव्रतफलं प्राप्नोतीत्यर्थः । सकामः सर्वकामयुक्तोऽपि निष्कामो भवति । मदेककामनया तत्तत्कामानां स्वयमेवापगमात् । निष्कामः सकामो भवतीति पाठे निष्काम आत्मारामः सोऽपि सकामो मद्दिदृक्षादिकामो भवति । किं बहुना अश्रोत्री श्रोत्रेन्द्रियरहितोऽपि, उपलक्षणं चैतत सर्वेन्द्रियवृत्तिरहितोऽपि । स च द्विविधः आत्मारामोऽनभिव्यक्तेन्द्रियवृक्षादिश्च । सोऽपि तल्लीलाश्रवणवेणुवादनादिप्रभावेण श्रोत्रादि इन्द्रियमान् भवति इत्यर्थः । यथा श्रीभागवते "परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवानिति" । "गोगोपकैरनुवनं नयतोरुदार वेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः । अस्पन्दनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयो र्विचित्रमिति" । ६॥

**श्रुत्वा तद् वाचं हि वै स्मृत्वा रौद्रं तद्वाक्येन तीर्त्वा तत् सौर्यां हि वै गत्वाश्रमं पुण्यतमं हि नत्वा मुनिं श्रेष्ठतमं हि वै रौद्रञ्चेति ॥७॥**

ततस्तासां तदनुरूपं चेष्टितमाह-श्रुत्वा तद्वाचं हीति । हि इति निश्चये वै स्मरणे तस्य वाचं श्रुत्वा सामर्थ्यबोधकवाक्येन प्रोत्साहं लब्धा गन्तव्यतया आदौ रौद्रं रुद्रांशं दुर्वाससं स्मृत्वा

तद्वाक्येन तेन बाक्य न कृष्णो ब्रह्मचारीत्येवं रूपेण ततूसौर्य्यां हि तामगाधामपि गाधीभूतां सौर्य्यां सूर्य्यतनयां तीर्त्वा हि प्रसिद्धं पुण्यतमाश्रमं गत्वा रौद्रं श्रेष्ठतमं मुनिं दुर्बाससं नत्वेति योज्यम् । पाठबिपर्य्ययेऽसौ बास्ति । एबमुत्तरत्र च । इतीति अन्यदपि तदाराधनं कृत्वेत्यर्थः ॥७॥

**दत्त्वा ऽस्मै ब्राह्मणाय क्षीरमयं घृतमयं मिष्टतमं 'ह बै' ॥८॥**

तथास्मै ब्राह्मणाय क्षीरमयादन्यन्नं दत्वा तूष्णीं स्थिता इति शषः ॥८॥

**तुष्टः स त्वामुक्त्वा हित्वाशिषं प्रयोज्यान्वाज्ञां त्वदात्**

स तु आभुंक्त्वा आ सामस्त्येनोपभुज्य । " श्रीकृष्णप्रेयस्य एता, मम महाभाग्येनैब स्वहस्तरन्धितविबिधान्नं मह्यमानीतमिति" बिचारेण । तादृशोऽसौ ताः प्रतितुष्टः हित्वा पात्रलीनं तदुच्छिष्ठं परित्यज्य आशिषं प्रयोज्य ताभ्यो बिस्तीर्य्य अन्वाज्ञां अनुज्ञां अदात् परमादरादिना न किञ्चिदुक्तबानित्यर्थः । यद्वा तुष्टः सन् भुंक्त्वा तत्रापि अहित्वा, न किंचिदपि त्यक्त्वा आभुंक्तेति क्त्वाल्यबभावश्छान्दसः ॥९॥

**कथं यास्यामोऽतीर्त्वा सौर्य्या ॥१०॥**

अथ ता ऊचुरितिज्ञेयम् । तासां बचनमेबाह-कथं यास्यामो तीर्त्वा सौर्य्यामिति ॥१०॥

**स होवाच मुनिं दुर्वाशिनं मां स्मृत्वा मार्गं वो दास्यतीति ॥११॥ १२॥**

स होवाचेति स दुर्बासाह स्फुटमुबाच ॥११॥ यथा दूर्वाशिनं दूर्वाभोजिनं दूरे अशनमस्यास्तीति बा दूर्बाशिनं निराहारं मां स्मृत्वा स्थितानां बो युष्माकं दास्यति मार्गं विपर्य्ययेण योज्यम् ॥१२॥

**तासां मध्ये श्रेष्ठा गान्धर्वीत्युवाच । तं ह वै ताभि रेवं विचार्य्य ॥१३॥**

तासां मध्ये श्रेष्ठा गान्धर्व्वी नाम काचित् तं मुनिं ह स्फुटं इति वक्ष्यमाणमुवाच । गान्धर्व्वी श्रुत्वा चेति हि शब्दान्तः क्वचित्पाठः । किं कृत्वा ताभिरन्याभिः स्वसखीभिः सममेवं विचार्य्य ॥१३॥

**कथं कृष्णो ब्रह्मचारी कथं दुर्वाशनो मुनिः ? ॥१४॥**

किं तद्विचार्योवाच तत्राह-कथं कृष्णो ब्रह्मचारी कथं वा मुनिरयं दूर्वाशिन इति । तत्र मुनिं दुर्व्वासिनं मां स्मृत्वेति । दुकारं ह्रस्वान्तं सकारं च दन्त्यादिं पठित्वा केचिदेवं व्याचक्ष्यते । दुर्वासिनं दुर्वाससमात्मारामभित्यर्थः । एतदूद्धं च कथं दुर्वासिनो मुनिरिति तथा व्याख्याने च स्युः । उभयत्रापि अकारान्त एव हि दुर्वासिन-शब्दः । दुर्वाससो मुनिः त्वव्याघातश्च । संतोषवहुभोजनात् कृष्णस्यास्मत्सन्बन्धेन ब्रह्मचारित्वव्याहृतिवदितिवदितिभावः ॥१४

**तां हि मुख्यां विधाय पूर्वमनु कृत्वा तूष्णीमासुः ॥१५॥**

अन्याश्च किं चक्रुरित्याशंक्याह-तां हीति तां गान्धर्व्वीं मुख्यतमां विधाय । मुख्यां कृत्वानु पश्चात् पूर्वं कृत्वा अग्रेश्वरीं विधाय तूष्णीमासुः ॥१५॥

**शब्दवानाकाशः शब्दाकाशाभ्यां भिन्न स्तस्मिन्नाकाशे तिष्ठति, स ह्यकाश स्तं न वेद स ह्यात्माहं कथं भोक्ता भवामि ॥१६॥**

भूतभौतिकादन्यन्तर्यामिणोऽक्रियत्वात् कृष्णो ब्रह्मचारीत्यादिकं युज्यत इत्यभिप्रेत्य मुनिराह-तत्र जीवभूतस्यात्मनस्तावदभोक्तृत्वं स्थापयति । शब्दगुण-युक्त आकाशो नाम वर्त्तते । तदुभयभिन्नो विलक्षणस्तस्मिन् देहस्थे शब्दवत्याकाशे तिष्ठति, सहीति । शब्द-

वानप्याकाशस्तमन्तर्यामिनं न वेद । मध्यसौ तिष्ठतीति । स हि साक्षिभूत आमा अहं समस्तोऽपि विलक्षणं स्वादनेन आत्मा अहं कथं भोक्ता भवानीति स्वस्यापि तदनाविशेन श्रोत्रेन्द्रिय-भोगो निषिद्धः कृतः ॥१६॥

स्पर्शवान् वायुः स्पर्शवायुभ्यां भिन्नस्तस्मिन् वायौ तिष्ठति, वायु र्न वेद तं स ह्यात्माहं कथं भोक्ताभवामि ॥ रूपवदिदं हि तेजो रूपाग्निभ्यां भिन्नस्तस्मिन्नग्नौ तिष्ठत्यग्नि र्न वेद तं स ह्यात्माहं कथं भोक्ता भवामि ॥ रसवत्य आपः रसाप्भ्यो भिन्नस्तास्वप्सु तिष्ठति, तं ह्यापो न विदुः स ह्यात्मा कथं भोक्ता भवामि ॥ गन्धवतीयं भूमिर्गन्धभूमिभ्यां भिन्नस्तस्यां भूमौ तिष्ठति, भूमि र्न वेद तं, स ह्यात्माहं कथं भोक्ता भवामि ॥१७॥

स्पर्शवानित्यादिषु वाय्वादयो व्याख्येयाः । अयं भावः भोग्याः शब्दादयः भोगोऽधिष्ठानं आधारमात्रं शरीरं करणं श्रोत्रादिः । भोगः साक्षात्कारः स चानुभवरूपः अनुभवश्च स्वप्रकाशात्मनः, न च कर्तृत्वं वात्मनः संभवति किंतु स्वानुभवेन विषयीकरणमात्रम् । न चानुभवविषयता जडस्य संभवति, सम्बन्धाभावात् । सर्वज्ञानाध्यासादेव आत्मनो नास्ति भोक्तृत्वमिति ॥१७॥

इदं हि मनस्तेष्वेव हि मनुते तानिदं गृह्णाति ॥१८॥

कथं तर्हि भोक्ताहं शृणोमीत्यादि प्रत्ययः इत्याशंक्य मनस एव तथा प्रत्यय इत्याह इदं हि मन इति तेषु श्रोत्रादिषु इन्द्रियेषु अधिष्ठितं सन् श्रोत्राद्यनुसारेणैव मनुते । चित्ततादात्म्यापन्नत्वाच्छब्दादीननुभवति तस्मात्तानाकाशादीनिदं मन एव कर्त्तृ गृह्णाति ॥१८॥

**यत्र सर्व्वमात्मैवाभूत्तत्र वा कुत्र मनुते क्व वा गच्छतीति स ह्यात्माहं कथं भोक्ता भवामि ॥१६॥**

एवं तर्हि तवाप्यन्यलोकवदन्तः करणावच्छिन्नत्वादहं भोक्तेत्यध्यासः स्यादित्याशंक्य स्वस्मिन्नध्यासनिवृत्तिं दर्शयति — यत्र सर्वमिति। यत्रात्मज्ञानदशायां विदुषः सर्वं कार्य्यकारणजातमधिष्ठानतत्वज्ञानात्मैवाभूत रजतमिव शुक्तिः, तत्र तत्तद्दशायां वा कुत्र धर्मिणि केन करणेन को मन्ता मनुते, एवं ज्ञानेन्द्रियपर्य्याया अपि अध्याहर्त्तव्याः, क्व वादिशिकेन करणेन को वा गच्छतीत्येवं तु कर्म्मेन्द्रियपर्य्याया अप्याध्याहर्त्तव्याः। करणादीनामात्मभूतत्वाज् ज्ञानिनः सर्वाध्यासनिवृत्ते भोक्तृत्वाध्यासनिवृत्तिः, स हीति, स कार्य्यकारणसाक्षी आत्मैव। तथापि निरवशेषं सानदं च यदिदं मम भोक्तृत्वं तच्छ्रीभगवत्प्रियतमयुष्मत्सम्बन्धेनैव ॥१६॥

**अयं हि कृष्णो यो वो हि प्रेष्ठः शरीरद्वय-कारणं भवति ॥२०॥**

श्रीकृष्णस्य तु सर्वकारणत्वेन सर्वातिरिक्तशक्तित्वादेव न तावत कार्य्यशक्तिपराभूततेत्याह अयं हि कृष्ण इति। अत्र कृष्णशब्दस्यान्यथार्थ परिहारार्थमयमिति। यो वो हि पृष्ट इति चोक्तं शरीरद्वयकारणं चोपलक्षणं सर्वस्य कार्य्यस्य एतदप्यात्मनैव बोध्यम्। सर्वेषां निजाविर्भावादीनामपि कारणात् ॥२०॥

**द्वौ सुपर्णौ भवतो ब्रह्मणोंशभूतस्तथेतरो भोक्ता भवति. अन्यो हि साक्षी भवति; भोक्ताऽभोक्तारौ वृक्षधर्मे तिष्ठतः पूर्वो हि भोक्ता भवति, तथेतरोऽभोक्ता भवति ॥२१॥ २४॥**

समष्टिव्यष्टिरूपयोः शरीरयोर्मध्ये व्यष्टिविचारोऽपि समानयो-

रपि मद्विधजीवतद्विधतदन्तर्यामिणो र्महद्देवान्तरमित्याह द्वाविति सहचराबित्यर्थः। सुपर्णाविति चेतनाबित्यर्थः। भवत् इत्यादितया तथैव वर्त्तते। तत्र तयोरुभयोर्मध्ये ब्रह्मणोऽंशभूतो मंडलस्थानीयस्य रश्मिपरमाणुस्थानीय इतरो जीवो भोक्ता भवति। देहे भोक्तृत्वमविद्ययात्मनि मन्यते। अन्यः साक्षात्तदंशी त्वीश्वरः-साक्षी, केवलमीक्षिता भवतीत्यर्थः। इति शब्दो मन्त्रसमाप्त्यर्थः। तथा तथा त्वं ब्रह्मणः श्रुतेस्तु शब्दमूलत्वादिति न्यायेन अचिन्त्यशक्तिमयत्वात् ॥२१॥

श्रीकृष्णाभेदेनैव तदन्तर्यामिणस्तादृशत्वमिति वक्तुं पुनस्तदेवानुवदति। वृक्षधर्म इति। वृक्षस्य धर्म्मो वृश्चनाख्यो धर्मो यस्मिन् तस्मिन् वृक्षधर्मे व्यष्टौ समष्टौ वा शरीरे तिष्ठतः ॥२२॥

अतइति। यद्यपि वृक्षधर्मे तिष्ठतस्तथाप्यतः पूर्वोक्तादीश्वरत्वाभावेश्वरत्वसद्भावहेतोरेव। तौ भोक्ताभोक्तारौ भवतः ॥२३॥

तदेव विविनक्ति-पूर्वो भोक्ता भवति तथेति तुशब्दार्थे। इतरः ईश्वरः पुनरभोक्ता भवति। ननु भवतु तावदीश्वरस्याभोक्तृत्वं कृष्णस्य किमायातं तत्राह-कृष्ण इति कृष्ण एव तत्रांशे तावद्रूपेण वर्त्तत इत्यर्थः। "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति" तदुक्तेः ॥२४॥

**यत्र विद्याविद्ये न विदामो विद्याविद्याभ्यां भिन्नो विद्यामयो हि यः स कथं विषयो भवति इति ॥२५॥**

श्रीकृष्णे तु ततोऽप्यतिशयमाह यत्रेति विद्याविद्ये मायावृत्तिरूपे "विद्याविद्ये मम तनू विद्धयुद्धव शरीरिणाम्। बन्धमोक्षकरी आद्ये मायया मे विनिर्म्मिते" इत्येकादशे तद्वचनात्। ते यत्र यस्य समीपेऽपि न विदामो न मन्यामहे। तदंशस्यान्तर्यामिन एव तदधिष्ठातृत्वात्। "यस्या गुणागुणांशांशे विश्वशक्तिरियं स्थितेति" श्रीविष्णुपुराणात्। तदेवाह-विद्याविद्याभ्यां भिन्नः पृथग्भूत्वा

स्थित इत्यर्थः। "त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः। मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थितमात्मनीति" प्रथमे श्रीमदर्जुनवाक्यात्। तथैव हेतुमाह-विद्यामयः विद्यात्र महाविद्या चिच्छक्तिः तत्प्राचुर्य्यवान् ततश्च स कथं विषयी भवतीति ॥२५॥

**यो ह वै कामेन कामान् कामयते स कामी भवति ॥२६॥**

नन्वस्यास्मासु विषयित्वमेवानुभूयते तत्राह यो ह इति, कामेन भोगाभिलाषेन कामान् विषयान् कामी विषयी अकामेनानुकूलविषयेण प्रेम्णा अत्र एतदुक्तं भवति "आत्मारामोऽप्यरीरमत्"। "प्रामृजत् करुणः प्रेम्णाः शन्तमेनांग पाणिनेत्यादि" श्रीशुकवाक्यात्। "नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तय" इत्यादि। "यत्वहं भवतीनां वै दूरे वर्त्ते प्रियो दृशाम्। मनसः संनिकर्षार्थं मदनुध्यानकाम्यया" इत्यादिश्च तद्वचनादकामनैव युष्मत् कामनात्तस्याविषयत्वमेव प्रेमलक्षणः सोऽयं च गुणः सर्वाश्रये परमभजनीयत्वेन संमते तस्मिन् अवश्यं मन्तव्यः। युष्माकं च तस्मिन् तादृश्यत्वमेव दृश्यते। "यत्ते सुजात चरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु। तेनाटवीमटसि यद्व्यथते न किं स्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः" इति भवद्वचनात्। ततो भवत्योऽपि न कामिन्य इति विषयसाधारण्यं न वहंति अत उभयेषां सम्बन्धः सोऽयं मुमुक्षुमुक्तभक्तानां अपि सुखप्रद इति। तस्मात्तस्मिन् युष्मासु च वयं विलक्षणत्वमेव लक्षामह इति ॥२६॥

**यो ह वैत्वकामेन कामयते सोऽकामी भवति ॥ जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्य्ये तिष्ठति, योऽसौ गोषु तिष्ठति, योऽसौ गोपान् पालयति, योऽसौ गोपेषु तिष्ठति, योऽसौ वेदेषु तिष्ठति, योऽसौ**

सर्वैर्वेदैर्गीयते, योऽसौ सर्वेषु भूतेष्वाविश्य भूतानि विदधाति, स वो हि स्वामी भवति ॥२७॥

लक्ष्मीनारायण इव भवतीभिर्नित्यमेव सम्बन्धः। सोऽयमिति। तद्ददेव। स्वरूपशक्तिभिर्भवतीभिर्नित्य एवाकामत्वात् कामित्वं वक्तुं न युज्यत इति वदेव। सपरिकरं स्थापयति। जन्मजराभ्यामिति। तत्र जन्मेति प्रारभ्य स वो हि स्वामी भवतीत्यन्तेन षड्भावविकाररहित इत्यर्थः। "एकस्त्वमात्मा। पुरुषः पुराणः सत्यः स्वयंज्योतिरनन्त आद्यः" इत्याद्युक्तेः, अतएव स्थाणुः स्वीयलीलागुणधामस्वव्यभिचारी, तदेव विवृणोति योऽसौ सौर्य्ये सूर्य्यमंडले कामगायत्रीध्येयत्वेन प्रतिरूपतया तिष्ठति यद्वा सौरी यमुना तस्या अदूरभवो देश इत्यर्थः। सौर्य्येऽत्र कृष्णवनं भद्रवनमिति वक्ष्यमाणात् तस्यास्तीरविशेषद्वयरूपविवक्षितः। सहस्रनाम्निसु यामुन इत्यत्र यामुनशब्देन यथा तद्भाष्यकारैस्तद्व्रजवासिनो व्याख्याताः। तदेतत् पर्य्यन्तेन तस्य कृष्णत्वं व्यज्य गोविन्दत्वं व्यनक्ति। योऽसौ गोषु तिष्ठति इत्यादिना। गोषु श्रीमन्नन्दगोकुलाख्यासु गोपा अपि तत्स्थाः प्रशक्तिकत्वात्। "वत्सैर्वत्सतरीभिश्च सदा क्रीडति केशवः। वृन्दावनान्तरगतः सरातो बालकैर्वृतः" इति स्कान्दात्। तदेवं गोभूमिवेदविदित इति पूर्वतापन्युक्तगोविन्दपदनिरुक्तेरन्तर्गतमर्थं प्रदर्श्य बहिरंगमपि दर्शयति सर्वेषु वेदेष्वित्यादित्रयेण। तत्र तृतीयेन तु भूमिविदितत्वं व्याख्येयम्। तत्रावेशो द्विविधः। अप्राकट्यसमये शक्त्या, प्राकट्यसमये तु साक्षादेवेति, विदधातीत्यत्र तु करोति विशिष्टतया स्थापयतीत्यादि यथायोग्यं योजनीयम्। स वो हि स्वामी भवतीति यच्छब्दनिर्दिष्टानां तच्छब्द एव तात्पर्य्यात्। हि शब्दोऽवधारणे। स च सर्वत्रान्वेति। स एव युष्माकमेव स्वामी वल्लभ एव भवत्येवेति दाम्पत्येन परम्पराव्यभिचारित्वं सम्मतम्। सम्प्रत्यन्यसम्बन्धस्तु मायिकरूपेणेति

भाव: । यथोपलक्षितम् । तस्मात्तस्य प्रेमैकनिष्ठत्वात् । अव्यभिचारित्वात्तु वियोगे नास्तीतिभाव: । तदेतदभीष्टं श्रुत्वा सा पुनरप्यपृच्छदित्याह-सा हो वाचेति । प्रश्नस्तु स्पष्ट एव । देवक्यां जात इति तु प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज" इति श्रीमन्नन्दं प्रति गर्गवाक्यस्य श्रवणात् । अयमस्य जीवनभूत आत्मा कथं भूमावतीर्ण: हि यस्मात् वै निश्चये ॥२७॥

**सा होवाच गान्धर्वी कथं वाऽस्मासु जातोऽसौ गोपाल: ? कथं वा ज्ञातोऽसौ त्वया मुने कृष्ण: को वाऽस्य मन्त्र: ? किं वाऽस्य स्थानं वा देवक्यां जात: ? को वाऽस्य ज्यायान् रामो भवति ? कीदृशी पूजाऽस्य गोपालस्य भवति ? साक्षात् प्रकृतिपरोऽयमात्मा गोपाल: कथं त्ववतीर्णो भूम्यां हि वै ? ॥२८॥ ३१॥**

अथ सर्वेषां प्रश्नानां क्रमानवेक्ष्य कस्यचित् काचिदुत्तरमुनिरुक्तवानित्याह श्रुति: । स हो वाचेति । तां गान्धर्वीं ह स्फुटं स दुर्वासा: उवाच । वै प्रसिद्धौ यत्र सर्वसन्देहोच्छेद इति ॥२८॥३१॥

**स होवाच तां ह वै एको हि पूर्वं नारायणो देव:, यस्मिन् लोका ओताश्च प्रोताश्च । तस्य हृत्पद्माज्जातोऽब्जयोनि: ॥३२॥**

कथं त्वया ज्ञातोऽसौ मुने कृष्ण इति प्रश्ने नारायणोपदेशात् ब्रह्मणा ज्ञात: तदुपदेशान्मया कृष्णो ज्ञात: । यच्चान्यत् कृष्णसम्बन्धितया पृष्टं तदपि ज्ञातमिति वक्तुं श्रीनारायणब्रह्मसंवादं प्रस्तौति । एको हीत्यादि पूर्वं जगत्सृष्टे: प्राक् । एको हि वै नारायण आस इह इति पाठे इह मायिके लोके आसीदिति । क्वचित्संदेहो न कर्त्तव्य: ॥३२॥

"नाराज्जातानि तत्वानि नाराणीति विदुर्बुधाः । तस्य तान्ययनं पूर्वं तेन नारायणः स्मृत" इति बचनात् । यस्मिन्निति यस्मिन् समस्तभगवत्स्वरूपमुख्ये श्रीकृष्णे लोकाः सर्वे प्राकृताः अप्राकृताश्च निजनिजेशतत्परिचारादिसहिताः ओताः पट इव दीर्घीभूतास्तन्तवः प्रोता अवान्तरलोका दीर्घतन्तुषु तिर्य्यक् तन्तव इव कदाचिद्व्यक्ततया तिष्ठन्ति ॥३२॥ (ख)

अब्जयोनिरपि नाभिपद्मसमुद्भवोऽपि तस्य हृत्पद्माज्जात इति । तत्संकल्पविशेषादेवोद्भूतत्वादन्यथा कृष्णजिज्ञासाभिनिवेशः कथं स्यात् । प्रथमं तेन हृदा संक्लृप्त अतो हृत्पद्मादित्युक्तिः, पश्चान्नाभिपद्मादाविर्भावित इति ॥३२॥ (ग)

## तपित्वा तस्मै बरं ददौ ॥३३॥

तपित्वा तपः कृत्वा स्थिताय तस्मै, यद्वा तपित्वा स्वं प्रकाश्य तस्मै बरं ददौ तं बरेण छन्दयामास इत्यर्थः । तपतीति तपः तद्वाक्याद् ब्रह्मा महाश्चर्य्यं तपः कृतवान्, तत्कारयता च अन्तर्य्यामितया तस्य समाहृते हृदि स्फोरितबान् इत्यर्थः ॥३३॥

## स कामप्रश्नमेव वव्रे ॥३४॥

स ब्रह्मा च कामं स्वाभिलषितमेब प्रश्नं बरं बव्रे । ममाभिलषितस्य प्रश्नस्य कारणार्थं अनुज्ञां देहि इति याचितबानित्यर्थः । यद्वा स ब्रह्मा याबान् प्रश्नमेव बव्रे । सर्वप्रकारेण सर्वतः परमोत्कृष्टबस्तुनः जिज्ञासया एब तस्य तपः प्रवृत्तेः । कामतः स्वेच्छया यद्विनयो याबान् प्रश्नो मया क्रियते सर्वस्यैबोत्तरं देयमित्यर्थः ॥३४॥

## तं हास्मै ददौ ॥३५॥

ततस्तं बरं ह स्फुटं अस्मै ददौ नारायण इति शेषः । परमेशेनानुगृहीततत्कालोदितपरमहर्षोद्रेकेनोत्फुल्लमना विविधसृष्टिरूपहृदि बिचारपरम्परयाबिष्टः सन् श्रीभगवत् प्रश्न एब तत्तदबतारलीलाजिज्ञासार्थं कृष्ण एब पूर्वं नारायण आसीत् । स्वेच्छाबि-

ष्कृतविराड्रूपादिचतुराननद्वारेण तादृक् चराचरज्ञानार्थं प्रश्नः स्वयमेव कारित इति ॥३५॥

**स होवाचाब्जयोनिः अवताराणां मध्ये श्रेष्ठोऽवतारः को भविता येन लोका स्तुष्टा देवा स्तुष्टा भवन्ति यं स्मृत्वा मुक्ता अस्मात् संसाराद्भवन्ति कथं वाऽस्यावतारस्य ब्रह्मता भवति ? ॥३६॥**

स अब्जयोनिः ह स्फुटं उवाच प्रश्नं कृतवान्। प्रश्नमेवाह-योऽवताराणामिति। अवताराणां मध्ये यः श्रेष्ठः को भवितेत्यर्थः। श्रेष्ठत्वे लिङ्गं येन लोका इति। तेषु च यस्य श्रेष्ठत्वं तस्य वा कथं ब्रह्मता सर्वबृहत्तमता स्वयं भगवत्त्वेत्यर्थः। अवतारे सति सर्वबृहद्वृत्ताभावस्तदभावे च श्रेष्ठत्वाभावः स्यात् अथ च अवतारावतार्यादिभ्यः सर्वेभ्यो भगवत्स्वरूपेभ्यः सच्चिदानन्द-सामान्यात् समस्तात्मभूतसर्वानुस्यूतसर्वात्मकविशुद्धसर्वप्रकारेण प्रशंस्य स को भविता प्रकटो भविष्यति तमेव वदेति शेषः। येन स्मरणदर्शनश्रवणादि-विषयीभूतेन लोकाः प्राकृताप्राकृत-लोकवासिनः सर्वेऽपि सहेश्वरास्तुष्टा भवन्ति नान्य एव। तत्रैव परमनिरतिशयसुखचमत्कारात् देवा भगवत्स्वरूपाणि च यन्नाम-रूपादिसम्बन्धभाजो जीवाः क्षुद्रा अपि अनाराधका अपि यं स्मृत्वैव अन्यदन्तरंगसाधनं विनापि ब्रह्मात्मसाक्षात्कारं विना अस्मा-दतिदुस्तरात् संसाराद्विमुक्ता भवन्ति। मुक्ताः सन्तो यं प्राप्नुव-न्तीत्यर्थः। कथंवास्यावतारस्येति। अनापेक्षकमहत्वेन मुख्यं ब्रह्मत्वं भवति ॥३६॥

**स होवाच तं ह नारायणो देवः ॥३७॥**

स होवाचेति। तं ब्रह्माणं स नारायणः ह स्फुटमुवाच देवः स्वप्रयोजनैः सह क्रीडैकरसिकः सर्वतोऽतिद्युतिस्तुतियुक्त

श्रीकृष्ण इत्यर्थः ॥३७॥

**सकाम्या मेरोः शृङ्गे यथा सप्त पुर्य्यो भवन्ति, तथा निष्काम्याः सकाम्याश्च भूगोलचक्रे सप्त पुर्य्यो भवन्ति, तासां मध्ये साक्षाद् ब्रह्म गोपालपुरीति ॥३८॥**

अथ किं वास्य स्थानमित्यस्य च गान्धर्वीप्रश्नस्योत्तरं कैमुत्येन तु श्रीकृष्णस्य परब्रह्मत्वं व्यञ्जितम्। सर्वावतारश्रेष्ठत्व तु ब्रह्माणं प्रति श्रीनारायणो दर्शितवान् इति तद्वाक्यमुदाहरति-सकाम्या इत्यारभ्य साक्षाद्ब्रह्म गोपालपुरीत्यन्तेन। सकाम्या भोगमय्यः मेरोः शृंगमित्यूर्द्ध्वलोकोपलक्षणम्। सर्वोपरिष्ठान परं वैकुंठ इत्यर्थः। "या यथा भुवि वर्त्तन्ते पुर्य्यो भगवतः प्रियाः। तास्तथा सन्ति वैकुंठे तत्तल्लीलार्थमादृता" इति स्कान्द-पाद्मोत्तरखण्डादौ त्वेतद्व्यक्तमेवास्ति। तथेति निष्काम्याः सकाम्याश्चेति। मोक्षदा भोगदाश्चेत्यर्थः। भोगस्तु अत्र साष्टर्यादिमयो ज्ञेयः। उभयत्रापि सप्तपुर्य्यः। "अयोध्या मथुरा माया काशी कांची अवन्तिकाः। पुरी द्वारावती ज्ञेयाः सप्तैता मोक्षदायिका" इति। विवक्षितमाह तासां मध्य इति। तासामपि मध्ये साक्षाद्ब्रह्मपरमाश्रयस्वरूपैव गोपालपुरी, हि निश्चये। यद्वा निष्काम्या मोक्षदा सकाम्या कामफलदा, अधिकारितारतम्येन, हि निश्चितं गोपालपुरी मथुरा साक्षात् ब्रह्म भवति, ब्रह्मप्रकाशकत्वात्। ब्रह्मभूतपदार्थान्तरव्यवधानात् ॥३८॥

**सकाम्या निष्काम्या देवानां सर्वेषां भूतानां भवति ॥३६**

पुनः सकाम्येत्यभिशयार्थं श्रीकृष्णस्यैव ब्रह्मत्वपरमकाष्ठां कैमुत्येन वक्तुं तद्विहारधाम्नोऽन्यत् सर्वस्मादुत्कर्षसुखतश्चार्थतो वर्णयिष्यन् भूमिकां रचयति सकाम्या इति ये देवता ये यजन्ति ते तत्तस्थानं गत्वा भोगं कृत्वा पुनर्जायन्ते इत्याशयेनोक्तं मेरोः शृंगे यथा सप्तपुर्य्यो भवन्ति इति काम्याविषयाः स्रक्चन्दनवनि-

तास्तैः सह बर्त्तन्ते। मोक्षस्तत्र नास्ति। यथा अयोधाद्याः सप्तपूर्य्यो भूगोले भवन्ति प्रकटीभूताः, बस्तुनो नित्यचिन्मया एव। न तु भूमिरूपा मायया भूतसृष्टतया जातास्तातु निष्काम्या निर्गताः काम्या बिषया याभ्यः अनित्यबिषयभोगेति मत्वा नित्यसुखकामनया संश्रितानां तु तत्वज्ञान भक्तिजननेनाबश्यं श्रीहरिर्नित्यकैंकर्य्यादिमोक्षश्चेति। अत्र सप्त पुरीणां ब्रह्मत्वेऽपि श्रीमथुराया बिशेषमाह। गोपालस्य नन्दगोपकुमारत्वेन श्रीकृष्णस्तावत् शुद्धसत्वमहाप्रेमशक्ति... पूर्णतमसर्बशक्त्यालिंगितो ब्रह्मानन्दरसैकमहोदधेः, श्रीकृष्ण धाम सा निष्काम्या एव श्रीकृष्णैकान्तप्रेमभक्तिजननात्। अत्र रागिबिरक्तादिबिशेषाधिकारो नोपलक्षत इत्याह– सर्बेषां भूतानामिति। तादृशी शक्तिर्गोपालपुर्य्यां बर्त्तते। यत्तृणमपि ब्रह्माणं करोति। भक्त्यु परममपि हरिभक्तिबिबशं करोति, निरंकुशतया सबस्य सर्बानुत्तमार्थान् अतिसुदुर्लभानपि अबाञ्छितानपि ददात्येबेति प्रकट एब दृश्यते ॥३९॥

**यथा हि वै सरसि पद्मं तिष्ठति, तथा भूम्यां तिष्ठतीति चक्रेण रक्षिता हि वै मथुरा, तस्माद् गोपालपुरी भवति ॥४०॥**

तर्हि शब्दस्य रसादेश्चोपलब्धिस्वप्नमायागन्धर्वनगरभावनाभिनिवेशशुक्तिरजतबिभ्रमादितुल्यत्वे भक्तानां सुखं बा नां श्रीभगबच्चरणसरोजसेबाध्यानमननादिना तदभिनिवेशो न स्यादेब तत्राह यथेति भौमत्वदृष्टिं निबारयति यथा सरसि पद्मं तिष्ठति तथैब भूम्यां मथुरा। किं च यथा सरस्युद्भूतस्य पद्मस्य तद्दोषगुणाग्रहणं प्रत्युतपरमसौरभमधुमत्वादे बिरुद्धधर्म्मस्यैब धारणं तथा मथुरापि भूदोषगुणौ न गृन्हाति। स्वेनासाधारणेन गुणेन प्रकाशते। तच्च श्रीकृष्णशक्तिप्रभाबादतः श्रीकृष्णदर्शनादिना भ्रमरूपं नश्यति। तत्स्थानादेः प्राकृतदृष्टिः न तिष्ठत्येब, हि निश्चये, बै

प्रसिद्धौ, यतः स एव कृष्णः गोपगोपवनिताभिर्निरन्तरं निरवद्य-मखण्डसच्चिदानन्दस्वरूप- तद्धान्नानुभूयते। तत्सुखस्यैवास्वादः पृथिव्यामेतावानेव विशेषः हि यस्मान्मथुरा गोपालस्य चक्रेण रक्षिता अग्निशस्त्रादिभ्यः। तस्माद् गोपालपुरी भवति। तदेवं उपासनानुसारेणैव तासामूर्द्धाधस्तत्प्रतीयमानत्वेन उभयविधत्वं यथा गोपालस्य नानात्वमिति। यद्यपि भूसंसर्गेऽप्यस्या असं-सक्तस्वभावादप्रच्युतिः, शक्तिभिरतर्क्यत्वात् तथापि दोषसंसर्गः कदापि नास्ति। तद्दृढि[illegible]। अत्र श्रीकृष्णप्राप्त्ययोग्याज्ञानं संसर्गाणाँ न भवत्येव योग्यानां स्यादेव। मथुरायां चापराधाति-रिक्तमिथ्याभाषणादिजन्यपापं न जायत एव। जातमपि तदैव तत्रैव पुण्योत्पत्त्या नश्यति ॥४०॥

**'वृहद् वृहद्वनं मधो मधुवनं काम्यः काम्यवनं बहुलो वहुलावनं कुमुदं कुमुदवनं खदिरः खदिरवनं भद्रो भद्रवनं भाण्डीर इति भाडीरवनं श्रीवनं लौहवनं वृन्दया वृन्दावनं। एतैरावृता पुरा भवति ॥४१॥**

एवं पुर्यासनत्स्थानं निरूप्य तद्बहिस्थितानां वनानामपि प्रतिपा-दयति बृहदित्यादिना। तत्र तेष्वेव गहनेष्वेवमित्यन्तेन तत्र बृहदि-त्यादिकं स्पष्टयति। बृहत्वाद्विस्तीर्णत्वाच्छ्रीकृष्णगोकुललीलया प्रथममप्रवृत्त्या महत्वाद्वा बृहद्वनमित्यर्थः। मधो मधुनाम दैत्यस्य कदाचित्तत्र कृतनिवासस्य बधलीलास्थानत्वात् मधुवनमित्यर्थः। केशितीर्थवत् मधुवंशनिवासाद्वा। तालस्तज्जातीयतदाधारत्वेन तल्लीलाविशेषस्थानत्वात् तालवनम्। काम्यतः सर्वेषां कमनीयः श्रीकृष्णस्तत्र विहरतीति बहुविधलीलास्थानं काम्यवनं। बहुलो श्रीहरेः पत्नीति [illegible]। तस्या स्थानविशेषत्वेन वनमपि बहुला। त[illegible]र्थः। [illegible] बहुलास्मिन्नस्तीति बहुलः स

चासौ बनं चेति बहुलाबनम्। "तस्मिन् पुण्यबने राजन् बहुपुण्यफलानि च। तत्रैव रमते बिष्णुर्लक्ष्म्या सार्द्धं सदैब हि" इति स्कान्दमथुराखण्डात्। लक्ष्मी श्रीकृष्णरूपमोहिता सती ब्रह्मभाबाभिनिवेशेन गोपीस्वरूपं कृत्वा तत्र बने स्थिता इति। कुमुदं नित्यपुष्पिततज्जविशेषः स च तल्लीलाबिशेषकौतुकाबहः। तद्योगात्तदेब कुमुदबनम्। एबं खदिर इति। खदिराख्यो बृक्षो बाहुल्येन यत्रास्ति तत् खदिरबनम्। भद्रः श्रीबलभद्रः। कृष्णबनं कृष्णसाहित्येन। भद्रबनमिति बक्ष्यमाणत्वात्। तस्य लीलाबिशेषधारित्वात् तदभिन्नेन भद्रबनमिति। भाण्डीरो नाम कृष्णलीलारसप्रबाहस्फीतो वटबिशेषः। सोऽत्र बर्त्तत इति हेतोः भाण्डीरबनं। श्रीबनमिति स्पष्टत्वात् तन्निरुक्तिः। श्रियो बनं श्रीबनम्। लोहबनमिति लोहजंघस्य बनमिति। तन्नाम दैत्यबधस्थानं, श्रीकृष्णबिहारबनं, बृन्दायाः लीलाख्यमहाशक्तिप्रादुर्भावबिशेषरूपायाः, पाद्मकार्त्तिकमहात्म्यप्रसिद्धायाः संबन्धीति सर्वश्रीकृष्णलीलास्पदत्वव्यक्त्या माहात्म्यबिशेषो दर्शितः। अतो मधुरेण समापयेदितिन्यायेन सर्बान्त एवोपदिष्टम्। बनतीर्थभ्रमणबिधानं श्रीबाराहे तथैब दृश्यते। बृन्दा श्रीराधाया ऐक्यं एकात्मभाबं प्राप्ता तुलसीदामरूपेणापि बक्षः स्थिता या बृन्दाया बनं। श्रीबृन्दाबनस्थलीरूपापि हरिप्रेमास्पदीभूता जाता पद्मपुराणीयमथुराखंडे तु एबं-"ततो बृन्दाबनं पुण्यं बृन्दादेबीसमाश्रितम्। हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेबितम्। बनं सुगहनं तत्र बिशालं बिस्तृतं बहु। मुनीनामाश्रमैः पुण्यारण्यबृन्दसमन्वितम्। बृन्दा नाम्नी हरेः पत्नी न्यबसद्धरिमन्दिरे। तन्नामा तच्छिबारण्यं जातं बृन्दाबनं शिबम्। सर्वदा त्वभजत् कृष्णं पद्मास्या पद्मलोचना। अहो बृन्दाबनं पुण्यं यत्र कृष्णः सदैब हि। सत्यादियुगकालेषु लक्ष्म्या सार्द्धं बिनोदितम्। तस्मिन् बृन्दाबने पुण्यं गोबिन्दस्य निकेतनम्। तत्सेबकसमाकीर्णं तत्रैब स्थीयते मया। भुबि गोबि-

न्द्वैकुण्ठं तस्मिन् बृन्दावने नृप !। यत्र बृन्दादयो भृत्याः सन्ति गोबिन्दलालसाः। बृन्दाबने महापद्मे यैर्दृष्टः पुरुषोत्तमः। गोबिन्दस्य महीपाल ते कृतार्था महीतले। तत्रैब द्वादशादित्या गोबिन्दपदसेबिताः। एकादशतया रुद्रास्तत्र तिष्ठन्ति सर्वदा। बदन्ति गुणनामानि गोबिन्दस्य तदानने। नृत्यन्ति बिस्मृताशेष-मैश्वर्य्यं प्रेमविह्वलाः। अहो बृन्दाबनं धन्यं यत्र बिष्णुमहोत्स-बान्। कुर्व्वन्ति सुरदेबाश्च गोबिन्दस्मरणोषणाः। मर्द्दितः कालीयो यत्र केशी यत्र निपातितः। पातिता बहवो दैत्या यस्मिन् बृन्दाबने नृप !। यथा भक्तिः प्रियतमा यथा भक्तिपराः नराः। गोबिन्दस्य प्रियतमं तथा बृन्दाबनं भुबि। बत्सैर्वत्सतरीभिश्च साकं क्रीड़ति माधबः। बृन्दबनान्तरगतः सरामो बालकैर्बृतः। गोबर्द्धनस्य भगबान् यत्र गोबर्द्धनो धृतः। रक्षिता यादबाः सर्वे इन्द्रबृष्टिनि-बारणात्। तत्र जातं ब्रह्मकुंडं ब्रह्मणा तोषितो हरिः। इन्द्रादि-लोकपालानां जातानि च सरांसि हि। यत्राभिषिक्तो भगवान् मघोना यदुबैरिणा। गोबिन्दकुंडं तज्जातं स्नानतात्रेण मुक्तिदम्। तत्रैब चोर्बसीकुडं कुण्डमाप्सरसं परम्। राधयाराधितो बिष्णुः राधाकुंडं तु तद्बने। अहो बृन्दावने रम्ये यत्र गोबर्द्धनो गिरिः। यत्र तीर्थान्यनेकानि विष्णुदेबकृतानि च। गोबर्द्धनः स्वयं तत्र बुभु-जेऽन्नं चतुर्व्विधम" इत्यादि। बृन्दा नाम्नी हरेः पत्नी पद्मा च राधया सह अतितादात्म्यभावात् कदाचिद्राधा स्वयमुपचरन्ती बृन्दया सह कृष्णं रमयति अतो बृन्दायाः पत्नीत्वम्। एतेन श्रीबृन्दाबनबासमात्रेण कृतार्था भबन्ति। बृन्दा नाम विशुद्धमधुरं सर्वतः प्रशस्तं बृन्दं आश्रयत्वेन बर्त्तते यस्यास्तस्या बनं तदा-त्मकं तत्प्रकाशकम्। बृहद्वनादिबनवृन्दाधिष्ठातृनिजबृन्दं यस्या अस्तीति सा बृन्दा श्रीराधायाः सखीरूपा। श्रीकृष्णानुरागेण समस्तगोपसीमन्तिनीभ्यः प्रिया। तत्केलिस्थलं श्रीबृन्दावनगोपीबृ-न्दविहारोत्कृष्टं सोपकरणं तत्तत् समये तत्तल्लीलाबृन्दं नित्यप्र-

काशकरं भूयस्तरं निजसखीतः स्वतोऽपि नृत्यादिकलाचमत्कारं च तस्या वनं वृन्दावनमिति च ॥४१॥

**'तत्र तेष्वेव गहनेष्वेव' देवा मनुष्या गन्धर्वा नागाः किन्नरा गायन्तीति नृत्यन्तीति॥४२॥**

तत्र तेष्विति तत्र मथुरामण्डले तेषु गहनेषु वेदैरपि दुर्गमेषु मुनीश्वरैरपि वनस्य प्रभावेन श्रीकृष्णैकप्रेमधनाः मनुष्या निवसन्ति इति बोद्धव्यम् । देवा इति यत्र देवादयस्तत्परिकराः, गायन्तीति गानं कुर्वन्ति । नृत्यन्ति प्रेमावेशेन नृत्यादिकं कुर्वन्ति । यथै-वोक्तं बृहद्गौतमीये-"अत्र देवाश्च भूतानि वर्त्तन्ते सूक्ष्मरूपतः" इति । इति शब्दोप्रणामार्थो प्रेमयोग्यानामेव तत्प्रवेशादि । तत्प्रेमवतां देवादीनामेव तत्रावास इति । एवं गन्धर्वादयः प्रेम्ना गायन्ति नृत्यन्ति च संगीतरीत्या श्रीकृष्णसन्तोषार्थं गायन्ति नृत्यन्ति चेति । प्रेमानन्दरसोन्मादत्वात् ॥४२॥

**तत्र द्वादशादित्या एकादश रुद्रा अष्टौ वसवः सप्त मुनयो ब्रह्मा नारदश्च पञ्च विनायकाः वीरेश्वरो रुद्रेश्वरोऽम्बिकेश्वरो गणेश्वरो नीलकण्ठेश्वरो विश्वेश्वरो गोपालेश्वरो भद्रेश्वर आद्यानि लिङ्गानि चतुर्विंशति भवन्ति ॥४३॥ ४४॥**

अन्यांश्च कांश्चिद्गणयति तत्रेत्यादिना विनायका इत्यन्तेन । तत्र तेषु वनेषु द्वादशादित्यादयः सन्तीतिवोद्धव्यम ॥४३॥

तत्र लिंगरूपाणि रुद्राधिष्ठानानि च नित्यान्येव वर्त्तन्ते इत्याह । वारेश्वर इत्यादिना भवन्तीत्यन्तेन । वीरेश्वर इत्यादिना अष्टौ गणयित्वाह आद्यानीति इत्यादीनि इत्यर्थः ॥४४॥

**द्वे वने स्तः कृष्णवनं भद्रवनं, तयोरन्त द्वादश वनानि**

**पुण्यानि पुण्यतमानि तेष्वेव 'देवा' स्तिष्ठन्ति सिद्धाः सिद्धिं प्राप्ताः ॥४५॥**

पुन र्वनान्येव सामान्यविशेषत्वेन बोधयन् देवोपलक्षितपूर्वोक्तनित्यदेवादीनां स्थितिमनुवदन् साधनसिद्धानामपि तेषां कथयति द्वे वने इत्यादिना सिद्धिं प्राप्ता इत्यन्तेन। तयोरन्तरिति भद्रवनान्तस्तच्चतुर्थानि चत्वारि भद्र-श्री-लोह-बृहच्छब्दादिसंज्ञानि। कृष्णवनान्तराणि श्रेष्ठानि तेषु कानिचित्पुण्यानि। कानिचित्पुण्यतमानि। देवा आदित्यादयः सिद्धा नित्यसिद्धा गोपादिरूपाः श्रीकृष्णपरिकराः सिद्धिं प्राप्ताश्चान्ये साधकवरास्तदन्तः प्रविष्टाश्चन्द्रध्वजादयः। तत्रापि स्वेष्टदेवोपासनया वनस्थदेवता स्वाभाव्यात् कृष्णभक्तिवासनावन्तः शीघ्रमेव भवन्तीत्यर्थः ॥४५॥

**तत्र हि रामस्य राममूर्त्तिः प्रद्युम्नस्य प्रद्युम्नमूर्त्तिः अनिरुद्धस्य अनिरुद्धमूर्त्तिः कृष्णस्य कृष्णमूर्त्तिः ॥ वनेष्वेवं मथुरास्वेवं द्वादश मूर्त्तयो भवन्ति ॥४६॥४७॥**

चतुर्व्यूहात्मकस्य श्रीभगवतो नित्यां स्थितिं दर्शयति तत्रेत्यादिना कृष्णमूर्त्तिरित्यन्तेन। तत्रेति तत्र पुर्य्यां तेषु वनेषु चेत्यर्थः। हि प्रसिद्धौ राममूर्त्तिरिति रामाख्या या मूर्त्तिः सैव। न तु शेषाद्याख्येत्यर्थः। एवमुत्तरत्रापि स्थितिस्त्वेषां यथा सम्भवं ज्ञेयम्। न तु सर्वेषां सर्वत्र। श्रीमथुरादौ चतुर्णामपि। श्रीवृन्दवनादौ चतुर्णामपि रामकृष्णयोरेव युक्तत्वात्। किंच रामस्य रामाकारा मूर्त्तिः नारायणांशसंकर्षणाविष्टा। एवं प्रद्युम्नादेः कृष्णस्य च कृष्णाकारा मूर्त्ति एवं द्वादश मूर्त्तयो वनेषु भवन्ति। मल्लानामशनिरित्यादि वद्रुद्रादीनां भावभेदेन त एव द्वादशधा स्फुरन्तीत्याह वनेष्वेवमिति एवं प्रकारास्तेषु वनेषु तथा एवं प्रकारा मथुरासु। मथुराप्रदेशेषु द्वादश मूर्त्तयो भवन्ति। किंच एवं यथा वनेषु

तथा मथुरासु मथुरापुरीप्रदेशेषु द्वादश बनमूर्त्तयो भवन्तीत्यर्थः ॥४६॥४७॥

**एकां हि रुद्रा यजन्ति द्वितीयां ब्रह्मा यजति तृतीयां ब्रह्मजा यजन्ति, चतुर्थीं मरुतो यजन्ति पञ्चमीं विनायका षष्ठीं वसवो यजन्ति सप्तमीमृषयो यजन्ति अष्टमीं गन्धर्वा यजन्ति नवमीमप्सरसो यजन्ति दशमीह वै ह्यन्तर्धाने तिष्ठति । एकादशमेति स्वपदं गता द्वादशमेति भूम्यां हि तिष्ठति ॥४८॥**

द्वादशानां मूर्त्तिनां प्रत्येकमुपासकानाह एकां हीत्यादिना अन्तर्द्धाने गुप्ता तिष्ठतीत्यर्थः । एकादशमा एकादशीति या प्रसिद्धा सा स्वपदं स्वधाम गता प्राप्ता । द्वदशमा द्वादशीति या प्रसिद्धा सा भूम्यां हि तिष्ठति विशेषव्याख्या त्वग्रे कर्त्तव्या ॥४८॥

**तां हि ये यजन्ति ते मृत्युं तरन्ति मुक्तिं लभन्ते गर्भजन्मजरामरणतापत्रयात्मकं दुःखं तरन्ति ॥४९॥**

तामिति तां भूमिष्ठां सर्वामेवेति वा मृत्युं तत्परम्परां तरन्ति । यतो मुक्तिमविद्याविमचिकां लभन्ते तद्विमोचोकाच्च गर्भादिदुःखं तरन्त्येवेति ॥४९॥

**तदप्येते श्लोकाः प्राप्य मथुरां पुरीं रम्यां सदा ब्रह्मादिसेवितां । शङ्ख-चक्र-गदा-शार्ङ्ग-रक्षितां मुपलादिभिः ॥ यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः । रामानिरुद्ध-प्रद्युम्नै रुक्मिण्या सहितो विभुः ॥५०॥**

उक्तेऽर्थे मंत्रसंमतिमाह तदपीति एते श्लोका मंत्राः प्राप्य मथुरांपुरीं रम्यामिति । मथुरां प्राप्य कृतार्था भवन्तीति । त्रिभिर्दलरा-

मादिभिः, शक्त्या रुक्मिण्या उपलक्षणत्वात् समस्तपट्टमहिषीवृन्दैरशेषपट्टमहिषीभिश्च सह यत्र समाहितः सावधान एव तत्तल्लीलासौष्ठवेन स्थित इत्यर्थः। तावत्सु समाहिततायां हेतुमाह-विभुरिति। तदेवं रामस्य तद्वय् हतां निर्दिश्य को वास्य ज्यायात्रामो भवतीति श्रीगान्धर्वीप्रश्नस्योत्तरं ददतः प्रद्युम्नादयोऽपि तादृशत्वेन दर्शिताः तदुपलक्षितायां देवक्यामपि तदाविर्भावशक्त्या "प्रागयं वसुदेवस्ये"त्याद्यनुसारेण चतुर्भुजतया प्रकटीभूत इत्यभिप्रायेण कथं वा देवक्यां यात इति तत्प्रश्नस्योत्तरं यथैवा कथं वास्मासु जात इत्यस्य च तत्प्रश्नोत्तरं पुनः सूचितम्। तेष्वपि भवत्स्वपि नित्यं पुत्रादिरूपेणास्तीति तेषु चतुर्भुजतया भवत्सु च द्विभुजतयाविर्भाव एव जन्मत्यभिप्रायात्। तदेवं श्रीकृष्णावतारोऽवताराणां श्रेष्ठ इति ब्रह्मणो माथुरमण्डलं वास्य स्थानमिति श्रीगान्धर्व्या उत्तरमायातम्। मथुरां प्राप्य वैकुण्ठात्तत्र प्रकटीभूय संस्थितः। देवक्यां जन्म लब्धवेत्यर्थः। रम्यां पुरीं पुरीमात्रतोऽपि रम्यां, सदा श्रीकृष्णप्राकाट्यकालेऽपि ब्रह्मादिभिः सेविताम्। चक्राद्यस्त्राभिमानि देवताभिः सदा सेवितम्, त्रिभिः रामानिरुद्धप्रद्युम्नैः रुक्मिण्या च शक्त्या सहितो विभुः ॥५०॥

## चतुःशब्दो भवेदेको ह्योङ्कारस्यांशकैः कृतः ॥५१॥

अथ कीदृशी पूजास्य गोपालस्य भवति इत्यस्मिन् श्रीगान्धर्वी-प्रश्ने पूजात्कर्षार्थं श्रीकृष्णं प्रति स्नेहविरोध-संपादनाय स्वाभेदोपासनां श्रीनारायणवाक्येनैवोपदिशन् को वास्य मन्त्र इत्यस्य तत्प्रश्नस्योत्तरत्वेन प्रणवमेवोपदिशति। चतुः शब्द इत्यादिना। तदेवं श्रीकृष्णावतारोऽवताराणां श्रेष्ठा मथुरा चास्य प्राकट्यस्थानमित्युक्तं भवति। कथं वास्य आज्ञता भवतीत्युक्तेरुत्तरं वक्तुं प्रणवार्थमाह ह्योंकारस्येति हि यस्मादोंकारस्य अकारोकारमकारार्द्धमात्रारूपैरंशैः कृतो रामानिरुद्धप्रद्युम्नकृष्णाभिधेयो मूर्ति-

चतुष्टयव्यूहस्तस्माद्बीजाद् वृक्ष इवाभिव्यक्तः। चतुः शब्द चतुः संख्याको वेदः एक भवेत्। तदर्थमेव तात्पर्य्यौ भवेत् तस्मात् स एव महामंत्र इति भावः। शब्दो हि एको भवेदोंकार उदाहृत इति पाठे एकोंकारो यः स एव शब्दः सर्वोऽपि वेदो भवेदित्यर्थः। तदीयशब्दार्थयोस्तदात्मकत्वात् तथापि तदेवतात्पर्य्यम्। तस्मादेव परो रजसेति सोऽहमित्यवधार्य्यात्मानं गोपालोऽहमिति भावयेत्॥५१॥

**तस्मादेवं परो रजसेति सोऽहमित्यवधार्य्यात्मानं गोपालोऽहमिति भावयेत् ॥५२॥**

तस्मादेवं तस्मादेव हेतोः परो रजसेति। परो रजसो रजसः परामिति। अजपागायत्र्यर्थानुसारेण स गोपालोऽहमित्यवधार्य्य। सूर्य्यसत्तया रश्मिसत्तावत्तत्सत्तयैव मत्सत्ता इति निश्चित्य गोपालोऽहमिति भावयेत्। मूलतृप्त्यैव हि पल्लवतृप्तिर्भवतीति यत् किंचित् स्वस्मिन् कर्त्तव्य तत्तस्मिन्नेव कुर्य्यादित्यर्थः। जगद्व्यापारवर्जमिति न्यायेनात्यन्तसाम्यस्याभावात्। तत्राजपार्थो यथा। असौ परोक्षःसर्वकारणभूतःईश्वरः श्रीगोपालाख्यपरमावस्थो रजसो रजसोपलक्षितत्रिगुणप्रकृतितः परः। तथैव प्रतिपादितत्वात् स एव। अतः एतत् अपरोक्षतया भासमानं जीवाख्यं प्रत्यक् चैतन्यं कथमिदं तत्राह ओमिति। संधिश्छांदसः। तस्यैव प्रणवार्थत्वेन मूलस्वरूपत्वादित्यर्थः। दर्शयिष्यते प्रणवार्थपर्य्यवसानं श्रीगोपाल एव रोहिणीतनय इत्यादिना, तदेवं पुनश्च तस्यावतारस्य ब्रह्मत्वं साधितम्। किंच ओंकारस्य एकः शब्दो हि एव भवेत् सर्वस्य शब्दस्य तदात्मकत्वात्। ओंकारप्रभवा वेदा ओंकारप्रभवाः सुराः। उदाहृतश्च श्रुतिभिः। ओमित्येतदक्षरमिदं सर्वं, तस्योपव्याख्यानं भूत-भवद्-भविष्यदिति। सर्वमोंकार एव यच्चान्यत् त्रिकालातीतं तदप्योंकार एव सर्वं ह्येतद् ब्रह्म साऽयमा-

त्मा चतुष्पादित्यादि । तस्मादिति । प्रकृतेः परः सच्चिदानन्दरसोऽद्वितीयः । चैतन्यरूपेण प्रतिपाद्यो यो ब्रह्मएवं ब्रह्म रूपेण प्रतिपाद्योऽद्वितीयश्चैतन्यरूपोऽर्थः । अहं तद्रूपेण स्थितः तदभेद इत्यवधार्य्य प्रकृतितत्कार्य्यं कालत्रयेऽपि नास्तीति निश्चित्य गोपालोऽहमिति भावयेत् । अद्वितीयपरिपूर्णस्वप्रकाशचिदानंदैकरसं ब्रह्म तदेव ब्रह्मतद्रूपेणैवात्मानं भावयेदित्यर्थः । ५२॥

**स मोक्षमश्नुते, स ब्रह्मत्वमधिगच्छति, स ब्रह्मविद् भवति गोपान् जीवान् वै आत्मत्वेनासृष्टिपर्य्यन्तमालाति स गोपालो भवति ५३॥**

तदुपासनस्य फलमाह-स मोक्षमित्यादिना स गोपालो भवतीत्यन्तेन । प्रथमं तावत् मोक्षमविद्यामोकमश्नुते । ततश्च ब्रह्मत्वं शुद्धचिद्रूपत्वेन ब्रह्मसमानरूपत्वम् । ततश्च ब्रह्मवित् । नराकृतिपरब्रह्मानुभवी भवति । ततश्च गोपान् स्वानुजीविनो यश्चात्मत्वेन परमस्नेहादात्माभेदेन आसृष्टिपर्य्यन्तं सर्गप्रलयोपलक्षितं कालं सर्वमेवव्याप्य आलाति स्वीकरोति गोपालः स एव भवति । गोपवर्गवत् स्नेहादिना तदभिन्न इव तन्निकटे तिष्ठतीत्यर्थः । "यथा त्वं सह पुत्रैस्तु यथा रुद्रो गणैः सह । यथा श्रियाभियुक्तोऽहं तथा भक्तो मम प्रिय" इति वक्ष्यते । लक्षणां विना तु परमतमपि नाभासते । सृष्टिः प्रसर्गादिकः कालः पर्य्यन्तः प्रलयादिकः । तयो र्द्वन्द्वैक्ये सृष्टिपर्य्यन्तं तदभिव्याप्य सृष्टिपर्य्यन्तं गोपान् जीवान् वै इति क्वचित् पाठः । नन्वेवं चेत् श्रीकृष्णस्य को विशेषस्तत्राह स गोपालो भवतीति हि एव । श्रीकृष्णाख्य एव गोपालो भवति न त्वन्योऽपीत्यर्थः ॥५३॥

**ॐ तत्सत् । सोऽहं परब्रह्म कृष्णात्मको नित्यानन्दैकरूपः 'सोऽहमों तत्' ॥५४॥**

"अदृष्ट्वान्यतमं लोके शीलौदार्य्यगुणैः समम । अहं सुतो वामभवं पृश्निगर्भ इतिस्मृतः" इति श्रीदेवकीं प्रति तद्वाक्यात् । तर्हि भवान् कस्तत्राह-ओं तदिति प्रणववाक्यं तद्रूयत् परं ब्रह्म सोऽहमित्यर्थः। ननु तत् किं परं ब्रह्म नाम। नराकृतिपरब्रह्मणः कृष्णादन्यत् नेत्याह। परंब्रह्म शब्दाभिधेयो यः कृष्णस्तदात्मकस्तदनन्य एव। सोऽहं अतएव नित्यानन्दैकरूपोऽहमित्यर्थः। तथैवोपसंहरति ओं तदिति तस्मादों तद्रूयत् सोऽहं परंब्रह्मेत्यर्थः ॥५४॥

**गोपाल एव परं सत्यमबाधितं ॥५५॥**

गोपाल एव परं सत्यमबाधितमिति। तथापि तन्मूलत्वेनैव मम तद्रूपत्वमित्यर्थः ॥५५॥

**सोऽहमित्यात्मानमादाय मनसैक्यं कुर्य्यादात्मानं गोपालोऽहमिति भावयेत् ॥५६, ५७॥**

सोऽहमिति। तथाप्यन्योऽपि स गोपालोऽहमित्यात्मानमादाय विभाव्य मनसा ऐक्यं कुर्य्यात्। ऐक्यभावनयापासीतेत्यर्थः ॥५६॥

तदेव व्यनक्ति आत्मानं गोपालोऽहमिति भावयेदिति तदंशे तदेवेति बोद्धव्यम् ॥५७॥

**स एवाव्यक्तो नित्योऽनन्तो गोपालः ॥५८॥**

पुनर्गोपालस्यैव स्वस्मादपि श्रेष्ठत्वं दर्शयति। स एवाव्यक्त इति। न केनापि व्यज्यत इति स्वयं सिद्ध इत्यर्थः। यदुक्तं आत्मना गोपालस्वरूपेण ऐक्यं कुर्य्यात्। एक रूपत्वे एक रसत्वं प्रमाणतो निश्चितं कुर्य्यात्। स एव गोपालो व्यक्तः कस्यापि चोपासकस्य व्यक्तः प्रकटः। तस्य शुद्धप्रेमरसमग्नस्यान्यदृष्टचसंभवात्। अतो गोपाल एवाव्यक्तः स एव च नित्यः। अखण्डचैतन्यानन्दस्वरूपः ब्रह्मस्वरूपत्वात्। किन्तु स एवानन्तः गुणादिपरि-

च्छेदरहित: यादवेन्द्रस्वरूपेऽपि तदपेक्षया आनन्दशक्तिसौन्दर्य-माधुर्यादि चमत्कारस्य अन्यूनत्वात् गोपाल एव ॥५८॥

**मथुरायां स्थिति ब्रह्मन् सर्वदा मे भविष्यति । शङ्खचक्र-गदापद्मवनमालावृतस्तु वै ॥५९॥**

तदेवं पद्मनाभः स्वस्यापि तदनुगतिं दर्शयति । मथुरायामिति सर्वदा भविष्यतीति । एतद्द्वारकालेऽपि स सर्वदैव भविष्यतीत्यर्थः । तदावरणदेवतात्वेनेतिशेष: पूर्वतापन्यां हि यन्त्रप्रसंगे वासुदेवादयोऽपि तदावरणत्वेन दर्शिताः वासुदेवादीत्यादिना । चतुर्भुजश्रीवासुदेवरूपेण निजायुधेन विराजितम् ॥५९॥

**'विश्वरूपं परं ज्योतिःस्वरूपं रूपवर्जितं । हृदा मां संस्मरन् ब्रह्मन् मत्पदं याति निश्चितं ॥६०॥**

तत्र स्वस्याप्युपासनमाह-विश्वरूपमिति । विश्वं सर्वमेव रूपं यस्मिन् , चित्स्वरूपमिति क्वचित्पाठः । परंज्योतिः परमतेजः स्वरूपम् । अतएव स्वं असाधारणं रूपं यस्य तत् । रूपवर्जितं प्राकृतरूपरहितं मत्पदं मत्स्थानम् ॥६०॥

**मथुरामण्डले यस्तु जम्बूद्वीपे स्थितोऽपि वा । योऽर्चयेत् प्रतिमां माञ्च स मे प्रियतरो भुवि ॥६१॥**

उपासनायामपि प्रतिमोपासनायाः श्रेष्ठत्वं दर्शयति मथुरेति । जम्बुद्वीपमात्रेऽपि स्थितो योऽर्च्चयेत किमु मथुरामण्डलस्थितो इत्यर्थः । प्रतिमां मां चेति । प्रतिमारूपं मां चेत्यर्थः ॥६१॥

**तस्यामधिष्ठितः कृष्णरूपी पूज्यस्त्वया सदा ॥६२॥**

तत्र कीदृशी पूजास्येति श्रीगान्धर्व्वीप्रश्नस्योत्तरं विशेषेण वदन् श्रीकृष्णरूपस्य पूज्यत्वे परमाधिक्यमाह-तस्यामिति । त्वया परमाधिकारिणा कृष्ण रूप्येव तस्यां पूज्योऽहं न त्वेतत् पद्मना-

भादिरूपः ॥६२॥

चतुर्धा चास्याधिकारि-भेदत्वेन यजन्ति माम् ॥६३॥

अत्र श्रीकृष्णमपि केचिद्व्यूहभेदेनोपासते तदाह-चतुर्द्धा चास्येति। अस्योपासनस्याधिकारिभेद इति। मां श्रीकृष्णरूपिणं यजति ॥६३॥

युगानुवर्त्तिनो लोका यजन्तीह सुमेधसः। गोपालं सानुजं रामरुक्मिमण्या सह तत्परं ॥६४॥

युगानुवर्त्तिनो लोकाश्चतुर्द्धा ध्यानादिप्रकारैर्मां यजन्ति इह सुमेधसः। गोपालं अनु पश्चाज्जायत इति। अनुजौ प्रद्युम्नानिरुद्धौ ताभ्यां सहितं सानुजं, गोपालं कीदृशं रमया रुक्मिमण्या सह वर्त्तमानं तत्परं यथा स्यात्तथार्चयेत्। स एव परः पुरुषार्थो यत्रेति ॥६४॥

गोपालोऽहमजो नित्यः प्रद्युम्नोऽहं सनातनः। रामोऽहमनिरुद्धोऽहमात्मानमर्च्चयेद् बुधः ॥६५॥

तत्र च पूर्ववदभेदोपासनं दर्शयति गोपालोऽहमिति। आत्मानं परमात्मानं ईदृक् शुद्धप्रेमरसमयगोपालरूपोऽहम्। भेदान्तरमुपलक्षयति रामोऽहमिति। एवमन्यत्रापि बोद्धव्यं, उपलक्षणतया कृष्णस्यांशत्वेनैवोक्तम्। प्रद्युम्नोऽहमिति च। इत्थंभावेन भावनाभेदैर्बहुप्रकारैरात्मानं भावयेत्। बुध इति स्वस्येष्टभावना सुदृढ़ इति ॥६५॥

मयोक्तेन स्वधर्मेण निष्कामेन विभागशः। तैरहं पूजनीयो वै भद्रकृष्ण-निवासिभिः ॥६६॥

पूर्वोक्तवनद्वयवासिभिस्तु मयोक्तेनेति बृहद्गोतमीयतंत्रादौ मया श्रीकृष्णरूपेण स्वयमुक्तेन स्वप्रापकस्वपासनेन निष्कामेणेति निष्कामतया विभागशः, तत्तदधिकारभेदेन तैरहं पूजनीयः। भद्रेति

भद्रबनकृष्णबननिबासिभिरित्यर्थः ॥६६॥

**तद्धर्मगतिहीना ये तस्यां मयि परायणाः । कलिना ग्रसिता ये वै तेषां तस्यामवस्थितिः ॥६७॥॥६८॥**

मथुरायाः महिमाधिक्यमाह तद्धर्म्मेति । भगवद्धर्म्मरूपा या गतिस्तया हीनाय । तथापि तस्यां स्थित्वा मयि परायणाः तथा ये कलिना ग्रसिताः पापात्मानः तेषां सर्वेषामेवाविशेषेण तस्यां मथुरायामवस्थितिः तदधिकारो भवति । नान्यतीर्थवत्पुण्यात्मनामेवेत्यर्थः । यथोक्तमादिवाराहे-"येषां क्वापि गतिर्नास्ति तेषां मधुपुरी गतिरिति ॥६७॥६८॥

**यथा त्वं सहपुत्रैश्च यथा रुद्रो गणैः सह । यथा श्रियाभियुक्तोऽहं तथा भक्तो मम प्रियः ॥६९॥**

तत्र भक्तानां वैशिष्ट्यं वदन् गतिं दर्शयति - यथा त्वमिति ॥६९॥

**स होवाचाब्जयोनिः चतुर्भिर्देवैः कथमेको देवः स्यादेकमक्षरं यद्विश्रुतमनेकाक्षरं कथम् भूतम् ॥७०॥**

अथ श्रीकृष्णस्य चतुर्द्धात्वे संदिह्य पृच्छतीत्याह-सहोवाचेति । चतुर्भिरामादिभिर्देवैः कथमेकः कृष्णाख्य एव देवः स्यात् । तत्र यत् करणं तदुच्यताम् । किंच प्रणवस्यैकाक्षरत्वेन प्रसिद्धेस्तद्वाच्योऽसौ एक एव स्यात् न तु चतुष्टयः । ततस्तस्य चतुष्टयाक्षरात्मत्वं वक्तव्यमित्याह - यत्प्रणवाख्यमेकमेवाक्षरं विश्रुतं ओमित्येकाक्षरं ब्रह्मेति शास्त्रावगतं तत्खल्वनेकाक्षरं कथं केन प्रकारेण भूतं बभूवेति ॥७०॥

**स होवाच तं ह वै पूर्वं ह्येकमेवाद्वितीयं ब्रह्मासीत्तस्मादव्यक्तं व्यक्तमेवाक्षरं तस्मादक्षरान्महान् महतो वा अहङ्कारस्तस्मादेवाहङ्कारात् पञ्चतन्मात्राणि तेभ्यो**

**भूतानि तैरावृतमक्षरं भवति ॥७१॥७२॥**

तत्र स नारायणः तं स्फुटमुवाच । एकस्मिन्नपि वस्तुनि अचिन्त्य-शक्त्या सर्वोऽपि भेदः संपद्यत इति व्यक्तमुपदिष्टवानित्यर्थः ॥७१॥

पूर्वं हि इति अथ यत्पृष्टं एकमक्षरं यद्विश्रुतमिति तद्द्विधापि संगच्छते । अनश्वरसर्वकारणवस्तुगतत्वेन प्रणवाख्यवर्णविशेषत्वेन चेति तत्र च आस्तां तावदनतिविलक्षणानां चतुर्णां व्यूहानां वार्त्ता, अति विलक्षणजगतोऽपि तथात्वे सैव कारणमित्याह पूर्वं हीति पूर्वं सृष्टेः प्राक् हि प्रसिद्धौ एकमेव ब्रह्मासीत् तत्र स्वरूपशक्त्याप्युक्तमिति । तस्माद् ब्रह्म त्वव्यक्तं सर्वब्रह्माण्डकारणशक्तिसमाहाररूपं । अथाप्राकृताकाशादीनामव्यक्तमासीत् ! अव्यक्तमेवैकाक्षरमिति । तदभिन्नमेव शक्तिशक्तिमतोरभिन्नवस्तुत्वात् । तस्मादव्यक्ततादात्म्यापन्नान्महत् महत्तत्वम् । महतो वै अहंकारः तस्मादेवेत्यादिषु गमं तैरावृतमिति बहिराच्छन्नं भवति घटशरावादिभिरिव । अक्षरोऽहमिति ओंकारश्चाहमिति च ॥७२॥

**'अजोऽहमस्म्यक्षरोऽहमोङ्कारोऽहमस्मि' ॥७३॥**

तत्र श्रीपद्मनाभः स्वस्य पूर्वोक्ताक्षररूपत्वेन प्रणवाक्षररूपत्वेन च अक्षरत्वं व्यञ्जयन् प्रणवस्यापि तद्द्वयरूपेण अक्षरत्वं दर्शयति । अक्षरोऽहमिति । तत्रोंकारस्य तद्रूपत्वमाह-अजर इति हि यस्मात् स ओंकारः अजरः तथाभयामृतः निर्भयपरमानन्दरूपः हि यस्मात् अभयब्रह्म तदैव स इति । स्वस्य च तद्रूपत्वमुदाहरति मुक्तोऽहमस्म्यक्षरोऽहमस्मीति ॥७३॥

**सत्तामात्रं चित्स्वरूपं प्रकाशं व्यापकं तथा । एकमेवाद्वयं ब्रह्म मायया तु चतुष्टयं ॥७४॥**

तदेवं जगदण्डरूपं भेदं दृष्टान्तयित्वा दार्ष्टान्तिकं चतुर्व्यूह-रूपमपि दर्शयन् ओंकारस्य वर्णरूपत्वेनापि भेदं दर्शयति । सत्तामात्रमिति श्लोकद्वयेन। सत्ताभावः चिदानन्दलक्षणः। तत्र चित्त्वं जडप्रतियोगित्वं आनन्दत्वं दुःखप्रतियोगित्वं इति तद्-द्वयप्रतियोगि किमपि यद्वस्तु तन्मात्रं तत्स्वरूपं शक्त्या तु विश्व-रूपं विश्वमनन्तरूपम्। रूपगुणशीलादिलीलावैभवं यत्र तत्। यतः प्रकाशं प्रकाशवत् । स्वपरगुणप्रकाशकं अतएव व्यापकं तदीदृशमेकमित्यादिना पूर्वोक्तं यद्ब्रह्म तदेव मायया स्वोपास-कान् प्रति कृपया सामान्यतस्तावत् चतुष्टयं भवच्चतुर्द्धाविर्भवति एकस्यैव तस्य तत्वस्य मायोपाधित्वेन मल्लक्षणपुरुषनामाक्षररू-पत्वं स्वतः पूर्णश्रीभगवद्रूपत्वमुपासनानुसारेण विभक्तचतुर्द्धे-त्यर्थः ॥७४॥

रोहिणीतनयो राम अकाराक्षर-सम्भवः ।
तैजसात्मकः प्रद्युम्न उकाराक्षरसम्भवः ।
प्राज्ञात्मकोऽनिरुद्धो वै मकाराक्षरसम्भवः ।
अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठितं ॥७५॥

अथ तच्चतुष्टयविभागं वदन् तच्च वर्णरूपत्वेनापि अक्षरशब्द-वाच्यतद्व्यंजकस्योंकारस्य विभागमपि दर्शयति रोहिणीति । अत्र रोहिणीतनयतया निर्देशश्चतुर्व्यूहान्तरभ्रमनिरासार्थः । अकाराक्षरेति । प्रणवाद्यक्षरेण संभवः प्रादुर्भावो यस्य सः सोऽयं च विश्वात्मको ज्ञेयः। तैजसप्राज्ञात्मकतया प्रद्युम्नानि-रुद्धयोः । विश्वशब्देनात्र प्रस्फुटमैश्वर्य्यम् । तैजसप्राज्ञशब्दा-भ्यां च ततो न्यूनन्यूनम्। जाग्रदाद्यवस्थाभेदेन जीवस्येव तत्त-दात्मकत्वात् । रामस्य तृतीयोऽद्ध वक्ष्यमाणत्वे न प्राज्ञात्मकताय। एव। ओंकारस्यैकाक्षरत्वेऽपि अकारोकारमकारार्द्धमात्रनिष्पन्न-

त्वात् तस्यानेकान्तरत्वं बासुदेबसंकर्षणप्रद्युम्नानिरुद्धाः, अर्द्ध-मात्रात्मक इति । सेयमर्द्धमात्रा बिन्दुनादात्मिका तस्यैब च तुर्य्यत्वात् सर्बोऽपि प्रणाब उच्यते । अतएब पूर्णप्रणवबिंदुनादेनेति श्रीकृष्णस्य पूर्णत्वं दर्शितम् । तदेबाह यस्मिन् बिश्वं प्रतिष्ठितमिति । सोऽयं प्रणवः शब्दरूपः श्रीभगवदवतार इति ॥७५॥

**कृष्णात्मिका जगत्कर्त्री मूलप्रकृतिरुक्मिणी ।**
**ब्रजस्त्रीजन-सम्भूतश्रुतिभ्यो ब्रह्म-सङ्गतः ।**
**प्रणवत्वेन प्रकृतित्वं बदन्ति ब्रह्मबादिनः ॥७६॥**

यस्मिन् सदानन्दात्मककृष्णशक्तिरूपत्वात् शक्तिशक्तिमतो रभेदात् कृष्णस्वरूपा जगत्कर्त्री मूलप्रकृतिर्ज्ञातव्येति शेषब्रजस्त्री श्रीराधारूपिणी तत्र सा रुक्मिणी प्रकृष्टतद्रूपत्वात् प्रकृतिरित्याह । जनसंभूतेति जनेषु संभूता याः श्रुतयः ताभ्यः प्रसिद्धो यो ब्रह्म संगः तस्माद्धेतो र्यत् प्रणबत्वं प्रकृतिस्तुतित्वं प्रसिद्धिस्तस्या ब्रह्म बादिनः प्रकृतित्वं बदन्ति । कृष्णतादात्म्यापन्नत्वात् कृष्णात्मिकेत्युक्तम् । जगत् कर्त्री मूलप्रकृतिरूपेति । ब्रजस्त्रीजनसंभूत श्रुतिभ्य इति । तासां ब्रह्मणा सबेतो बृहत्वयुक्तेन संगाद्धेतोः प्रणबत्वेन प्रकृष्टतया श्रुतीनामप्यभिव्यक्ताविर्भाबप्रकृतित्वं सृष्टत्वं बदन्ति ब्रह्मबादिनः बेदबदनशीलाः बेदप्रामाण्ये बदन्ति । यथोक्तं "बाराणस्यां बिशालाक्षी बिमला पुरुषोत्तमे । रुक्मिणी द्वारवत्यां तु राधा बृन्दाबनेबने" इति ॥७६॥

**तस्मादोङ्कर-सम्भूतो गोपालो विश्वसंस्थितः ॥७७॥**

तस्मादिति गोपालः ओंकारसम्यक्प्राप्तः । तस्माद्ब्रह्मरूपत्वादोंकारेण संभूतः प्रतिपादयत्वात् प्रादुर्भूतो गोपालः । बिश्वसंस्थितो विश्वाकारेण संस्थितः । बहुधा संस्थित इत्यर्थः ॥७७॥

**क्लीमोङ्कारयोरेकत्वं पठ्यते ब्रह्मवादिभिः ॥७८॥**

ननु क्लींकारस्यैव तन्महामन्त्रबीजत्वं प्रसिद्धं तत्राह क्लीमिति। क्लींकारओंकारयोरेकं एवैक्यं तस्य भाव ऐकत्वमेकत्वं द्वयमिदं तुल्यस्वरूपं तुल्यशक्तिकं तुल्यप्रतिपाद्यं चेति प्रणवव्याख्यानेन तस्यार्थः कथितः इति। ब्रह्मवादिभिर्वेदार्थतत्वज्ञैः ॥७८॥

**मथुरायां विशेषेण मां ध्यायन् मोक्षमश्नुते ॥७९॥**

अथ पूजाप्रस्तावेन ध्यानं तस्य स्थानविशेषं चाह मथुरायामिति। मथुरायामतिशयेन झटिति मोक्षमश्नुते। मत्प्राप्तिविघ्नाद्विमोक्षं प्राप्नोति ॥७९॥

**अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितं।**
**शङ्खध्वजातपत्रैश्च चिह्नितं चरणद्वयं।**
**श्रीवत्सलाञ्छनं हृत्स्थं कौस्तुभं प्रभया युतम्।**
**चतुर्भुजं शङ्खचक्र–शार्ङ्ग–पद्म–गदान्वितम्।**
**सुकेयूरान्वितं बाहुं कण्ठमालासुशोभितं।**
**द्युमत्किरीटवलयं स्फुरन्मकर-कुण्डलं।**
**हिरण्मयं सौम्यतनुं स्वभक्तायाभयप्रदं।**
**ध्यायेन् मम प्रियो वेणुशृङ्गधरन्तु वा ॥८०॥**

ध्यानं विशदयति अष्टपत्रमिति वेणुशृंगधरं वेत्यन्तेन। हृत्पद्ममिति उपासकानां हृदि ध्येयं पद्मं। तत्र मथुरायां संस्थितं ध्यायेदिति गतचपुर्थेनान्वयः। शंखादिचिन्हितं चतुर्भुजं ध्यायेत्। चतुर्भुजत्वे पंचायुधधारणमनुपपन्नमिति शार्गस्याग्रे स्थितिर्ज्ञेया। द्युमत् देदीप्यमानं सौम्यतनुं प्रसन्न–मधुराकृतिः, हिरण्मयं प्रकाशबहुलं चरणद्वयं ध्यायेत्। सुकेयूरान्वितं बाहुं ध्यायेत्। तथा कंठमालया सुशोभितं ध्यायेत्। सौम्यतनुं मधुराकृतिं अभयप्रदं मोक्षदं अथवा द्विभुजं ध्यायेत् वेणुशृङ्गधरं श्रीकृष्णं

गोपवेशं ध्यायेत् ॥८०॥

मथ्यते तु जगत् सर्वं ब्रह्मज्ञानेन येन वा।
तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते ॥८१॥

मथुरापदनिरुक्त्या ध्यानस्थानस्य माहात्म्यविशेषं दर्शयति - मथ्यत इति जगत्सर्वं अनेनेति येन ज्ञानेन ब्रह्मेति ब्रह्माख्यं भगवत्तत्वं मथ्यते मंथानेन नवनीतवद्व्यक्तीक्रियते वा शब्दादनुक्तसमुच्चयार्थोद्भक्तियोगेन वा येन। तद् द्वयं यस्यां, "सारभूतं सर्वोत्कृष्टं सा मथुरा निगद्यते। मथ्यते येनतन्मथुर्ज्ञानभक्त्याख्यं "साधनं तद्योगान्मथुरेत्यर्थः ॥८१॥

अष्टदिक्पालिभि र्भूमिपद्मं विकसितं जगत्।
संसारार्णव-सञ्जातं सेवितं मम मानसे ॥८२॥

अथ मन्दाधिकारिणां विराडुपासानानामपि स्वपूजांगध्यानत्वेन कल्पयति अष्टेति - अष्टभिर्दिक्पालभि दिक्पालैर्यद्भूमिरूपं पद्मं विकसितं प्रकशमानं यदेव संसारार्णवसंजातं प्रलयसमुद्रोद्भवं तज्जगत्सर्वमेव मम मानसे सेवितं यत्पद्मं महत्कमलाख्यं तद्रूपेणोपास्यमिति शेषः। दिक्पालभिरिति पाठे भिस एस भावश्छन्दसः ॥८२॥

चन्द्रसूर्य्यार्चिषो दिव्या ध्वजा मेरु र्हिरण्मयः।
आतपत्रं ब्रह्मलोकमधोर्ध्वं चरणं स्मृतम् ॥८३॥

चन्द्रसूर्य्यत्विष इति। चन्द्रसूर्य्यादीनां ज्योतींषि तानिम मदिव्या अलौकिक्य त्विषः इत्युपास्यमित्यर्थः। मेरुस्तु मम ध्वजारूपेणोपास्यमित्यर्थः। ब्रह्मलोकं ममातपत्रमुपासीत। अधोद्धर्वं अधोर्द्ध्वभावेन वर्त्तमानं सप्तपातालं चरणं स्मृतम् ॥८३॥

श्रीवत्सञ्च स्वरूपञ्च वर्त्तते लाञ्छनैः सह।

**श्रीवत्सलाञ्छनं तस्मात् कथ्यते ब्रह्मवादिभिः ॥८४॥**

श्रीवत्समिति-श्रीवत्सं तावत्त निजविग्रहे गौतमीयादिदृष्टया, स्वतः शुभ्रवर्णं तच्च चक्रवल्लांछनैर्भावार्थदीपिकादिसंमत्या दक्षिणावर्त्तरोमरूपैः सह वर्त्तते। विराड्विग्रहे च स्वरूपं वैराजजीवलक्षणं, लांछनैर्विराडवयवैः सह वर्त्तते। अतः साम्याभासाज्जीवात्मनोऽपि श्रीवत्सत्वं कथ्यते। तस्माद्विराजजीवलक्षणं स्वरूपं श्रीवत्सलांछनं कथ्यते ।८४॥

**येन सूर्य्याग्निवाक्चद्र-तेजसा स्वस्वरूपिणा ।**

**प्रवर्त्तते कौस्तुभाख्यं मणिं वदन्तीशमानिनः ॥८५॥**

येन स्वस्वरूपिणा सर्वजीवाश्रयेण तेजसा सूर्य्याग्निवाक्चन्द्राणां समाहारो वर्त्तते स्फुरति। कौस्तुभाख्यं मणिं सूर्य्याग्निरूपमेव वदन्ति। सूर्य्यादिकं कौस्तुभाभेदेनोपासत इत्यर्थः। ईशमानिनः विराडीशबुद्धयः निरुच्यते च। कः सूर्य्यलक्षणरूपत्वादग्निश्च। अवन्हिः वारः प्रथमत्वात्। औश्चंद्रः तत्तद्रूपं तेजस्तु भाति। स्वस्वरूपेण व्याप्नोतीति। तस्मात् सूर्य्यादिकमेव कौस्तुभत्वेनोपास्यमितिभावः। अकारस्तु सुवर्णं स्यात् वाक् एतत् सर्वं स्तु परमतत्वपरतन्त्रतया वर्त्तते चित् च रूपमेवेति ॥८५॥

**सत्वं रजस्तम इति अहङ्कार श्चतुर्भुजः ।**

**पञ्चभूतात्मकं शङ्खं कर रजसि संस्थितं ॥८६॥**

सत्वं रजस्तम इति अहंकारश्चेति चतुर्भुजत्वेन कल्पितैर्विराडपि चतुर्भुजदुत्थः। तस्माच्चत्वारस्ते भगवद्भुजत्वेनोपास्या इति भावः। एवं रजसः करविशेषत्वेन पंचभूतानि च शंखत्वेनोपास्यानि एवमुत्तरत्रापि। गुणत्रयमहंकारश्च तत्करविशेषत्वेन कल्प्यत इति ॥८६

**बालस्वरूपमत्यन्तं मनश्चक्र निगद्यते ।**

**आद्या माया भवेच्छार्ङ्गं पद्मं विश्वं करे स्थितं ॥८७॥**

बालस्वरूपमिति-अत्यन्तं यो बालस्तद्वच्चलं मन एव चक्रं निगद्यते। चक्रत्वेनोपास्यते। चलस्वरूपमिति क्वचित्पाठः ॥८७

आद्या विद्या गदा वेद्या सर्वदा मे करे स्थिता ॥८८॥

आद्या विक्षेपशक्तिरूपा माया सैव साङ्गम्। तद्रूपत्वेनोपास्येत्यर्थः। विश्वमेव करे स्थितं यत्पद्मं तद्रूपत्वेनोपास्यं। तम एवात्र करत्वेन कल्प्यम्। आद्या विद्येत्यत्र करत्वेनोपास्योऽहंकार इति ज्ञेयम् ॥८८॥

धर्मार्थकामकेयूरै र्दिव्यै 'र्नित्यमवारितैः'।
कण्ठन्तु निर्गुणं प्रोक्तं माल्यते आद्ययाऽजया।
माला निगद्यत ब्रह्मन् तत्र पुत्रैस्तु मानसैः ॥८९॥

धर्मार्थकामरूपैः केयूरैः केयूरत्वेनोपास्यैस्तैरन्वितो विराडुपास्य इत्यर्थः। तच्च आद्या अजयया कंठं माल्यते प्रपंचाभरणेन भूष्यते निर्गुणं ब्रह्मज्योतीतिशेषः। आवरणशक्तिरूपया अजया आव्रियते सैव माला निगद्यते। माल्यतयोपासितं विधीयत इत्यर्थः ॥८९॥

कूटस्थं सत्स्वरूपञ्च किरीटं प्रवदन्ति मां।
क्षरोत्तमं प्रस्फुरन्तं कुण्डलं युगलं स्मृतम् ॥९०॥

कूटस्थमविकृतं यत्स्वरूपं सर्वकारणमक्षरशब्दोक्तं मां नारायणं किरीटं प्रवदन्ति किरीटरूपेणोपास्यत इत्यर्थः। क्षरे जगति उत्तमं सांख्यं योगश्च इत्येतद्युगलं द्वयं स्मृतम्। प्रसिद्धं कुण्डलं प्रवदन्तीति सम्बन्धः। तथा श्रीभागवते "बिभर्त्ति सांख्यं योगं च देवो मकरकुण्डले" इति। यत्र तु अन्य एव पन्था स्पष्टा श्रुतिपुराणयोस्तत्तत्संप्रदायभेदेन पार्थक्यमन्तव्यम् ॥९०॥

ध्यायेन्मम प्रियो नित्यं स मोक्षमधिगच्छति।

**स मुक्तो भवति तस्मै स्वात्मानं च ददामि वै ॥६१॥**

तदेवं मन्दाधिकारिणां ध्यानमुक्त्वा तस्य च फलं साक्षात्तद्ध्यानमेवेत्यभिप्रेत्य तस्य तु फलमाह ध्यायेदिति। मोक्षाधिगममपि विशिष्टतयोपदिशति स मुक्तो भवति संसारबन्धं त्यजति। न केवलमेतावत् तस्मै आत्मानं च ददामि तद्वशो भवामीत्यर्थः ॥६१॥

**एतत्सर्वं भविष्यं वै मया प्रोक्तं विधे तव।**
**स्वरूपं द्विविधं चैव सगुणं निर्गुणात्मकं ॥६२॥**

उपसंहरति एतदिति। भविष्यं अग्रे भवतापि अनुभवनीयमुपदेश्यं चेत्यर्थः। एतदिति विब्रूणोति भविष्यं विधेर्विधानं तव तुभ्यं सगुणं अष्टदिक्पालाभिरित्यादिना प्रोक्तं, विराडाकारं निर्गुणं अष्टपत्रं विकसितमित्यादिना प्रोक्तं चतुर्भुजस्वरूपं वेणुशृंगधरं तु वा इति द्विभुजाकारं श्रीकृष्णगोपालरूपं चेति। ६२॥

**स होवाचाब्जयोनिः व्यक्तानां मूर्तीनां प्रोक्तानां कथमाभरणानि भवन्ति कथं वा देवा यजन्ति रुद्रा यजन्ति ब्रह्मा यजति 'ब्रह्मजा' यजन्ति विनायका यजन्ति द्वादशादित्या यजन्ति वसवो यजन्ति अप्सरसो यजन्ति गन्धर्वा यजन्ति स्वपदं गता अन्तर्धाने तिष्ठति कां मनुष्या यजन्ति ॥६३॥६४॥**

तत्र ब्रह्मणः सन्देहं दर्शयति सहोवाचेति प्रागुक्तं मूर्त्तिश्चाभरणयजनविधिं च जिज्ञासुः स अब्जयोनिः ह स्फुटमुवाच ॥६३॥ व्यक्तानामुपासकेषु प्राकटानां तत्र हि रामस्य राममूर्त्तिरित्यादिना प्रोक्तानां मूर्त्तीनां केन प्रकारेणाभरणानि रूप्यन्ते कथं देवा यजन्तीति। कथं यजन्ति कां च यजन्ति इत्यर्थः। व्यक्तीनामिति पाठे पृथग्भूतानामित्यर्थः। तत्र पूर्वोक्तादेव मारुतः, स्वपदानुगेति या दशमेति स्वपदं गतेत्युक्त्वा सा कीदृशी तां च कथं यजन्ती-

त्यर्थः। अन्तर्द्धाने तिष्ठति च। या दशमीत्यन्तर्द्धाने तिष्ठति सा कीदृशीत्यादि। कां मनुष्या यजन्तीति वा। द्वादशमेति भूम्यां हि तिष्ठतीत्युक्ता सा च कीदृशीत्यादि। अत्र व्यक्तमूर्त्तिनां कथमाभरणानि भवन्तीत्येकः प्रश्नः कृतः, कथं देवा यजन्तीत्यादि द्वितीयः प्रश्नः, कां मूर्त्तिं के यजन्तीति तृतीयः प्रश्नो वा शब्दादभिमतः ॥६४॥

**स होवाच तं हि वै नारायणो देवः आद्या अव्यक्ता द्वादशमूर्त्तयः सर्वेषु लोकेषु सर्वेषु वेदेषु सर्वेषु मनुष्येषु तिष्ठन्ति ॥६५॥६६॥**

तत्र प्रथमस्योत्तरमन्तर्भावयन्नन्ययोराहेत्याह। यच्च एकां हि रुद्रा यजन्तीत्याद्युक्तं। तत्कथं एकैव मूर्त्तिः सर्वैरिज्यते इति ब्रह्मापृच्छदित्याह श्रुतिः। यच्चोक्तं व्यक्तानां मूर्त्तिनां कथं त्वाभरणानि भवन्ति, कां मनुष्या यजन्ति, कीदृश्या मूर्त्या वा अन्तर्द्धाने तिष्ठतीति यदुक्तं तदुत्तरमाह-स नारायणो देवः, तं हि निश्चयपूर्वकं वै स्मरणे ह स्फुटमुवाच ॥६५॥

आदौ भवा आद्याः, यदा प्रकृतिरपि नासीत्तदापि विद्यमाना अनादिसिद्धा इत्यर्थः। तेन विशुद्धचिदैकरस-परिपूर्णा ब्रह्मस्वरूपा सा। परिच्छिन्नत्वेऽपि पूर्णत्वं किमिति नोपालभ्यत इति चेत्तत्राह अव्यक्ता अपीति पूर्णत्वेऽपि न व्यक्ता। तत्तदुपासकादन्यत्रानभिव्यक्ता अपि यदा व्यक्तीकरोति तदा पूर्णत्वमुपलभ्यते। सर्वेसु लोकेषु उद्ध्र्वेषु पुरुषोत्तमलोकमारभ्य वर्त्तते। भूरादिचतुर्द्दशलोके श्रीविग्रह इत्याशयेन, आद्या द्वादश मूर्त्तयः सर्वेषु देवेषु अतलादितललोकेष्वपि सर्वत्रैवेत्यर्थः। तिष्ठन्ति तत्तादुपासकेषु स्फुरन्तीत्यर्थः। यत् पूर्वं पूर्य्यां द्वादशमूर्त्तीनामेव च तासामस्तित्वं तेष्वेव देवास्तिष्ठन्तीति निर्द्धारितं तथापि स्थानध्यानेन अन्यैरप्यन्यं नोपास्यन्त इति तथोक्तम् ॥६६॥

रुद्रेषु रौद्री ब्रह्मण्येषु ब्राह्मी देवेषु दैवी मानुषेषु मानुषी विनायकेषु विघ्ननाशिनी आदित्येषु ज्योति गन्धर्वेषु गान्धर्व्यप्सरःस्वेव गौर्वसुष्वेवं काम्यान्तर्धाने प्रकाशिनी। आविर्भाव-तिरोभावा स्वपदे तिष्ठति। तामसी राजसी सात्त्विकी मानुषी ॥६७॥६८॥

इदानीं द्वादश श्रीकृष्णमूर्तीनां सर्वतः परमतत्त्वेऽपि तत्तद्विशेषणविशिष्टतया भिन्नानां तत्तदाराधक-गोचरत्वमिति वक्तुं विशेषेणाह-रुद्रेष्विति। रौद्री रुद्रप्रकृत्यनुसारिणी, रुद्राभिलषितार्थपूरणशक्तिमती। तत्तद्भावानुसारेण रूपगुणादिस्फूर्त्तिभेदात्तत्तद्विधा। मल्लानामशनिरित्यादिवत् इति कां मूर्त्तिमिति प्रश्नस्योत्तरं। ब्रह्मण्येष्विति प्रश्नविपर्ययेणोत्तरं, गौणत्वापेक्षया मानवेष्विति। ब्रह्मजसनकादिगतमुत्तरं तेषु हि देवत्वं मानवत्वं च मन्यन्ते। किंच रुद्रेषु देवेषु रौद्री रौद्रीं मूर्त्तिं रुद्रा यजन्तीत्यर्थः। एवं ब्रह्मलोके ब्राह्मी मूर्त्तिस्तिष्ठति। ब्राह्मी नाम्नीं मूर्त्तिं ब्रह्मा यजतीत्यर्थः। एवं दैवीं कैलाशादिदेवसद्मने देवा यजन्ति। यस्य या इष्टा मूर्त्तिस्तां मानवीं नराः कामिति। एवं सर्वत्र द्वादशविधोपासकमध्ये स्वस्वाभिलषितमुपासनमेवेति ज्ञेयम्। तत्र अप्सरःस्वेवं आप्सरसीत्यर्थः गौरिति गीयत इति गौः गाने स्फुरद्रूप इत्यर्थः। वसुष्वेवमिति वसुषु वासवी, सा च सर्वकाम्या सर्वकामप्रदा। अन्तर्द्धानेऽप्रकाशिनीति। तत्र या तिष्ठति सा पुनरप्रकाशिनी। केषाञ्चित् श्रवणमात्रगतत्वेन तथोच्यते इत्यर्थः। या तु कदाविर्भावा जगत्यवतीर्णा, कदाचित्तिरोभावा। ततोऽन्तर्हिता च भवति। सैव स्वपदे गोलोकाख्ये श्रीवृन्दावनस्यैव प्रकाशविशेषे निजधाम्नि तिष्ठति। यस्या एव तथा मूर्त्तिः पूर्णप्रकाशत्वं चेत्यर्थः। तदेवं रौद्र्याद्या एकादशमूर्त्तयोऽप्येकैकविधा ज्ञेयाः। आदि-नवानां गुणोपाधित्वादन्त्यत्रय-

स्य च निरुपाधित्वात् द्वादशी तु मनुष्याणां त्रिभेदानां स्फुरन्ती त्रिविधा ज्ञेयेत्याह-तामसीति । तत्तत्स्फूर्त्त्यनुसारेण मज्ञानामशनिरित्यादिवदेव ॥६७॥६८॥

**विज्ञानघनानन्दघन-सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति॥६९॥**

शुद्धभक्तियोगे तु तत्र तत्रान्यत्र च यथा स्वरूपमेव स्फुरतीति । स्वपदवासिनां तु सुतरामिति वदन् भक्तियोगस्यापि स्वरूपं द्योतयन्नाह- विज्ञानघन इति । विज्ञानं तत्तद्रूपगुणादिभिर्विशिष्टं यज्ज्ञानं स्वप्रकाशं यद्वस्तु तदेव घनो विग्रहो यस्य सः तादृशविग्रहस्वरूपः तथा च दुःखप्रतियोगित्वादानन्द एव घनो यस्य स श्रीकृष्णः । सच्चिदानन्दैकरसस्वरूपो यो भक्तियोगस्तत्र तिष्ठति स्फुरतीत्यर्थः ॥६९॥

**ॐ प्राणात्मने नमः । ॐ तत्सद् भूर्भुवः स्व रतस्मै वै प्राणात्मने नमो नमः ॥१००॥**

आविर्भावतिरोभावा स्वपदे तिष्ठतीति यदुक्तं तदाह बृहद्गौतमीये श्रीकृष्णवाक्यं-"इदं वृन्दावनं रम्यं मम धामैव केवलम्। पंचयोजनमेवास्ति वनं मे देहरूपकम् । कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी । अत्र देवाश्च भूतानि वर्त्तन्ते सूक्ष्मरूपतः । सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित्। आविर्भावस्तिरो भावो भवेदत्र युगे युगे । तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषेति" । ब्रह्मसंहितायां च "आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामीति" । अस्य सर्वोर्द्धत्वेनोक्तिस्तु उपासकभावापेक्षया तत्र स्फुर्त्तेः । वस्तुतस्तु अत्रैव दर्शितः श्रीभगवता ब्रह्महृदादुद्धृतान् गोकुलवासिनः प्रति - दर्शयामास लोकं स्वं गोपानां तमसः परमित्यादि श्रीभागवतात् । अत्रैवमेव स्वपदे तिष्ठत्युक्तेः । अथ कथं यजन्तीत्यस्योत्तरत्वेन-तदुपलक्षकत्वेन मन्त्रान् दर्शयति ओं नमः प्राणात्मन इत्यादिना ।

प्रेमरसात्मिकाय आविर्भावाय अवश्यं तथा ध्येयमन्यथा श्रीकृष्ण-सेवादेरसंभावादिति । परमां स्तुतिं सर्वस्य श्रीकृष्णात्मकत्वं प्रतिपादयन्ती श्रीकृष्णरहस्यं चाशेषतो निवेदयन्ती ब्रह्माणं प्रति श्रीनारायणोपदिष्टं श्रुतिराचष्टे । ओंकारस्तत्प्रतिपाद्यं परं ब्रह्म प्राणात्मने भवति । प्राणस्वरूपाय भवति । प्राणभावयोग्यो भवतीत्यर्थः । ओंकारप्रतिपाद्यं च तद्वस्तु ब्रह्माख्यं विचित्र-शक्तिः सन् न तु प्राणो जडः तच्च ब्रह्म भूर्भुव-स्व उपलक्षणम् । समस्तलोकवर्त्तिजीवरूपं तदात्मस्वरूपं तस्मै पर-ब्रह्मणे ओं ओमर्थभूतं परंब्रह्म कृष्णाय कृष्णपदार्थत्वाय योग्यं भवति । एवं गोविन्दाय तथा गोपीजनवल्लभाय । ओमर्थस्वरूपं तच्छ्री-कृष्णाकारं परं ब्रह्म सत् उत्कृष्टं अवस्थाविशेषे भातं । भूरित्यनेन भूर्लोकादिसप्तलोक ग्रहः, भुव इति मध्यलोक, स्वः इति उपरि-तनसप्तलोकः । तद्गतईशस्वरूपादुत्कृष्ट इत्यर्थः । यद्वा प्राण-वाच्यो यः प्राणाख्यवायोरात्मा अन्तर्यामी तस्मा एव ओमित्यु-पगमे तत् सत् स्वरूपवैभवं भूरादिलोकत्रयं च । तस्मा एव युज्यते । तस्मात्तस्मा एव नमः आत्मानं समर्पयामीति ।१००॥

**ॐ कृष्णाय गोविन्दाय गोपीजनवल्लभाय ॐ तत्सद् भूर्भुवः स्व स्तस्मै नमो नमः ॥१०१॥**

अथ सोऽसौ कस्तत्र स्फुटमाह ओं कृष्णायेति । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति तद्गीतातः । एवं प्राणात्मने नम इति सप्तदशकेन, किन्तु प्राणस्य हृदिस्थत्वात् व्यानस्य सर्वव्या-पकत्वान्मुख्यत्वेन तत्र तत्र श्रीकृष्णगोविन्दादिमुख्यतद्वैभवं योजितम् । अपानादीनां गौणत्वेन प्रद्युम्नत्वादिकं गौणमेवेति ज्ञेयम् ॥१०१॥

**ॐ अपानात्मने नमः । ॐ तत्सद् भूर्भुवः स्व स्तस्मै वै अपनात्मने नमः ॐकृष्णाय प्रद्युम्नायानिरु-**

द्धाय ॐ तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः- ॐ समानात्मने नमः । ॐ तत्सद् भूर्भुवः स्व स्तस्मै वै समानात्मने नमः ॐ कृष्णाय रामाय ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥ ओम् उदानात्मने नमः ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै उदानात्मने नमो नमः ॥ ओम् कृष्णाय देवकीनन्दनाय ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥ ओम् व्यानात्मने नमो नमः । ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै व्यानात्मने नमो नमः ॥१०२॥१०८

ओं अपानात्मन इत्यादिपूर्ववत्सुगमम् ॥१०२॥१०८॥

ओम् गोपालाय निजरूपाय ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥१०९॥

निजरूपायेति गोपालत्वमेव निजरूपं बोधयति । अतएव ब्रह्मणा तदेव परमपुरुषत्वेन प्रार्थितम् । "नौमीड्य तेऽभ्रवपुषे तडिदम्बराय गुंजावतंसपरिपिच्छिलसन्मुखाय । बन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजायेत्यादि" ॥१०९॥

ओम् योऽसौ प्रधानात्मा गोपाल ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥ ओम् योऽसाविन्द्रियात्मा गोपाल ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥ ओम् योऽसौ भूतात्मा गोपाल ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥११०॥११२॥

एवं योऽसौ प्रधानात्मेत्यादि । भूतात्मा महाभूतान्तर्यामी ॥११०॥ ॥११२॥

ओम् योऽसावुत्तमः पुरुषो गोपाल ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥११३॥

उत्तमः पुरुषः शुद्धजीवादप्युत्तमः । "उत्तमः पुरुष स्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्ययईश्वर" इति श्रीगीतातः ॥११३॥

ओम् योऽसौ परं ब्रह्म गोपाल ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥११४॥

ओम् योऽसौ सर्वभूतात्मा गोपाल ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥११५॥

ओम् योऽसौ जाग्रत्स्वप्नसुषुप्तिमतीत्य तुर्य्यातीतो गोपाल ओम् तत्सद् भूर्भुवः स्व स्तस्मै वै नमो नमः ॥११६॥

ब्रह्म निर्विशेषरूपः परं ब्रह्म सविशेषस्तत्प्रतिष्ठारूपः ब्रह्मणो हि प्रतिष्ठाहमित्यादि तद्गीतातः । सर्वभूतात्मा सर्वजीवान्तर्यामी । पृथक् पृथक् तत्तदधिष्ठाता तूर्य्यातीत इति । "विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत् त्रिभिर्हीनं तुरीयं तत्पदं बिदुरिति" इत्युक्तं तुर्य्यं बासुदेवाख्यमपि अतीतः । अथ नारयणः सोऽहं गुरुस्त्वेवं बिचिन्त्य इति ब्रह्माणमुपदिशति ॥११४-११६॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च ॥११७॥

एक इति । एक एव सर्वभूतेषु गूढोऽनुप्रविष्टोऽहम् । तत्सृष्ट्वा तदेवानुप्रविशदिति श्रुतेर्मुख्यप्रवेशं बारयति सर्वभूतान्तरात्मेति । मीमांसकमतं बारयति-कर्माध्यक्ष इति । फलमद्युपपत्ते-

रिति न्यायेन नैयायिकमतस्य तुल्यत्वं बारयति सर्वभूताधिपावास इति। सर्वभूतानां बासोऽधिष्ठानं स एव कर्त्ता, स एवोपादानमित्यर्थः। प्रकृतिदृष्टान्तानुरोधादिति न्यायेन परिणामितयोपादानं वारयति साक्षी निर्विकार इत्यर्थः। श्रुतेश्च शब्दमूलत्वादिति न्यायेन चिद्रूपत्वेऽपि स्वस्य चिच्छक्तित्वं दर्शयति चेता इति। तादृशत्वं चेक्षतेर्नाशब्दमिनि न्यायेन। शास्त्रमत्वस्य स्वाभाविकं दर्शयति केवल इति। "प्रकाशाश्रयवद्वा" तेजस्त्वादिति न्यायेन। न तस्य कार्य्यं कारणं च बिद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्बिविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः। तस्याः शक्तेः स्वाभाबिकत्वमेब प्रतिपादयति निर्गुणश्चेति। गुणा अत्र सत्वादयस्तत्प्रेरकत्वादिति भावः ॥११७॥

रुद्राय नमः। आदित्याय नमः। बिनायकाय नमः।
सूर्य्याय नमः। बिद्यायै नमः। इन्द्राय नमः।
अग्नये नमः। पित्रे नमः। निऋतये नमः। करु-
णाय नमः। मरुते नमः। कुबेराय नमः। ईशानाय
नमः। ब्रह्मणे नमः। सर्वाभ्यो देवताभ्यो नमः ॥११८॥

अथ तद्विभूतिरपि नमस्यत्वेनोपदिशति-रुद्रायेत्यादिपंचदशभिर्मन्त्रैः ॥११८॥

दत्त्वा स्तुतिं पुण्यतमां ब्रह्मणे स्वस्त्र पिणे।
कर्त्तृत्वं सर्वभूतानामन्तर्धाने बभूब सः ॥११९॥

उपसंहरति दत्वेति। तदेवं पुण्यतमां स्तुतिं सर्वभूतानां कर्त्तृत्वं च दत्वा अन्तर्हितबानित्यर्थः। स्वस्य स्वरूपमाविष्टतया बिद्यते यस्मिन् तस्मै ॥११९॥

ब्रह्मणी ब्रह्मपुत्रेभ्य नारदाच्च श्रुतं यथा। तथाप्रोक्तं

तथा प्रोक्तं तु गान्धर्वि ! गच्छ त्वं स्वालयान्तिकम् ॥१२०

अथ दुर्वासाः स्वोपदेशप्रामाण्याय स्वसम्प्रदायमाह ब्रह्मण इति। ब्रह्मणः सकाशाद्ब्रह्मपुत्रैः श्रुतं तेभ्यो नारदेन। तस्माच्च मया। मतश्च त्वयेत्यर्थः। स्वालयान्तिकं न तु स्वालयमेवेति। श्रीकृष्ण-गोचारणप्रसंगे वनागमनमभिप्रेयते ॥१२०॥

इत्याथर्वणोपनिषत्सु श्रीगोपालतापन्यामुत्तर-विभागः समाप्तः ॥

गान्धर्व्वी वर गान्धर्व गंधबंधुरशर्म्मणे।
वृन्दावनावनीवृन्दनन्दिते नन्दतात्मनः ॥

इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीश्रीप्रबोधसरस्वतीप्रकाशितायां श्रीगोपालतापनीयोपनिषद् टीकायां श्रीकृष्णवल्लभाख्यायां उत्तरभागटीका समाप्ता ॥०॥ शुभमस्तु ॥०॥

गोपालतापनी टीका प्रबोधस्वामिना कृता।
रामभद्रपतेरेषा भक्तिमुक्तिप्रकाशिका ॥१॥
नारायण हरे राम कृष्ण विष्णो जनार्द्दन।
गोविन्द माधवानन्त वासुदेव नमोऽस्तु ते ॥ श्रीकृष्ण

# दो शब्द

श्रीप्रबोधानन्द, बड़े रसिक आनदकंद, 'श्रीचैतन्य-चन्द्र' जू के पारखद प्यारे हैं। राधाकृष्णकुञ्जकेलि, निपट नवेलि कही, झेलि रस-रूप, दोऊ किये दृग तारे हैं॥ वृंदाबन बास कौ हुलास लै प्रकाश कियौ दियौ सुखसिंधु, कर्म धर्म सब टारे हैं। ताही सुनि सुनि कोटि कोटि जन रंग पायो, विपिन सुहायौ, बसे तन मन वारे हैं॥६१३॥

प्रस्तुत "गोपालतापनी उपनिषद्भाष्य" के रचयिता श्रीपाद-प्रबोधानन्दजी हैं जो कि महाप्रभु श्रीगौराङ्गदेवजी के अन्तरंग-परिकरों में प्रसिद्ध माने जाते हैं। इन्होंने "चैतन्यचन्द्रामृत" "संगीतमाधव" "बृन्दाबनशतक" "राधारससुधानिधि" "आश्चर्यरासप्रबन्ध" "श्रुतिस्तुतिव्याख्या" "गीतगोविन्द की टीका' आदि बहुतसे ग्रन्थों की रचना की है।

सम्प्रति गोपालतापनी उपनिषद् का भाष्य रूप यह "कृष्ण बल्लभा" नामक टीका प्रस्तुत होकर बिद्वन्समाज में उपस्थित है अब तक इसका प्रकाशन कहीं भी नहीं हुआ है, न इसकी दूसर कोई प्राचीन हस्तलिखित कापी का पता है। श्रीयुक्त गोस्वाम नीलमणीजी (राधारमणजी का घेरा वृन्दाबन) की कृपा से य ग्रन्थरत्न मुझे मिला तथा महाप्रभु की असीम कृपा समझ क मैं इसका प्रकाशन में प्रवृत्त हुआ।

अलमति विस्तरेण। इति

निवेदक

कृष्णदासबाबा

# श्रीगौरहरिप्रेस, कुसुमसरोवर, (राधाकुण्ड

## से प्रकाशित पुस्तकें:—

| क्र० सं० | ग्रन्थ | प्रणयता | ग्रन्थ |
|---|---|---|---|
| १ | विरुदावलीलक्षणम् | (श्रीपादरूपगोस्वामीकृत) | १ |
| २ | (लघु) श्रीश्रीनारायणभट्टचरितामृतम् | | १ |
| ३ | स्वकीयात्वनिराशविचार एवं परकीयात्वस्थापन | (श्रीपादविश्वनाथचक्रवर्तीकृत) | ११२, १ |
| ४ | श्रीश्रीमाधवेन्द्रपुरी एवं वल्लभाचार्य | | १ |
| ५ | श्रीमाधवदासजी की वाणी तथा आदर्शजीवनी | | ११५, १ |
| ६ | भक्तितत्वप्रकाशिका | (श्रीचैतन्यदासजीकृत) | १ |
| | गीतिविंशतिका | (श्रीगोस्वामीगोपीलालजीकृत) | १ |
| | भक्तिविवेक | (श्रीश्री नारायणभट्टजी कृत) | १ |
| | "अनर्पितचरीं चिरादिति" श्लोकस्य व्याख्या | (श्रीपादजीवगोस्वामी कृत) | १ |
| ७ | आमोदमहाकाव्यम् | (श्रीअनूपनारायणभट्टाचार्यकृत) | १ |
| ८ | श्रीकृष्णकौतुकम् | (श्रीश्रीपरमानन्दपादमहोदयकृत) | १ |
| ९ | श्रीगोपालतापनीउपनिषद्भाष्य | (श्रीपादप्रबोधानन्दसरस्वतीकृत) | १ |
| १० | श्रीभक्तभूषणसंदर्भः (सानुवादः) | (श्रीपादनार[illegible]भट्ट कृत) | १ |
| ११ | श्रीराधिकास्तोत्र (सानुवाद) | (श्रीपादप्रबोधानन्दसरस्वतीकृत) | १ |

**यन्त्रस्थ ग्रन्थ—**

१–(सानुवाद) गोविन्दलीलामृत (श्रीकृष्णदासकविराजगोस्वामीकृत)

२–साधनदीपिका (श्रीपादनारायणभट्टकृत)

३–रासपञ्चाध्यायी (रसिकाह्लादिनी)"